This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2373
04/03/15

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2373 विषय दर्शनशास्त्र

नाव • गादाधरी - केवलान्वयि ग्रंथ

लेखक/लिपीकार —

पृष्ठ 134 काळ पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ ॥तावदर्थविषयकयत्किंचिच्छाब्दबोधनिरूपितशाब्दज्ञाननिष्ठायाकारणतातत्तदवच्छेदकको
टिप्रविष्टयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वंव्यापकसमुदायत्वंन्यायलक्षणमिति। अत्रावच्छेदकतावच्छे
दकसाधारणकारणतावच्छेदकताकाभावकोटिप्रविष्टत्वनिवेशः। यदिचावच्छेदकतावच्छेदकसाधारणावच्छेद
कतानमन्यतेतदापिविनिगमनाविरहेणतावदर्थविषयत्ताया अवच्छेदकत्वंदुरुपपादं। परंतुतादृशीयायाकारणता
तत्तदवच्छेदकविषयितानिरूपकवर्णवृत्तिसमुदायत्वंनिवेशेनैव एकदेशवृत्तिसमुदायत्वमादायातिप्रसंगवार
णेव्यर्थंव्यापकत्वनिवेशनं। अस्मान्यत्वंकल्पद्रुयएवेतिनोदासीनवर्णसमुदायेतिव्याप्तिरिस्फुणाध्यायमलपरिष्का
रः। अत्रेदंबोध्यं। तावदर्थविषयकयत्किंचिच्छाब्दबोधनिरूपितायायाकारणतातत्तदाश्रयीभूतयत्किंचिज्ज्ञानीय
विषयितानिरूपकवर्णत्वव्यापकसमुदायत्वनिवेशेनैवोपपत्तौव्यर्थं अवच्छेदककूटप्रवेशनं। न्यायविषयकोदासी
नवर्णविषयकज्ञानमादायोदासीनसाधारणसमुदायत्ववारणंतवापितुल्यं। तादृशसमुदायत्वनिष्ठन्यूनवृत्तित्वा
निरूपकत्वस्यैवतदर्थंनिवेश्यत्वात्. नचस्वव्यापकतादृशसमुदायत्वव्यापकत्वरूपसमनैयत्यमेवनिवेश्यंनतुतादृ
शसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकत्वंगौरवात्. तथाचावच्छेदकाप्रवेशेऽदासीनविषयकन्यायविषयकयत्किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिज्ज्ञानमादायोदासीनसाधारणसमुदायत्वेति प्रसंग इति वाच्यं । समनैयत्यप्रवेशोन्यायद्वयविषयकयत्किंचि
ज्ज्ञानमादाय तादृशसमुदायत्ववारणाय तादृशसमुदायनिष्ठन्यूनवृत्तितानिरूपकं यद्यत्तदन्यत्वानिवेशस्यावश्य
कत्वेनावछेदकवैयर्थ्यस्य दुर्वारत्वात् । अथो चितानुपूर्वीकप्रतिज्ञादिपंचकसमुदायत्वं न्यायत्वमिति दीधिति
लभ्यते स्वाश्रयैकप्रतिज्ञोत्तरत्वशून्यहेत्वादिवृत्तिपर्याप्तसमुदायत्वं तत्तदन्यत्वं विशेषणदलनिष्कर्षः । ननु प्रति
ज्ञोत्तरहेतु[redacted] त्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपानुपूर्व्यवछिन्नभेदप्रतियोगितावछेदकत्वं प्रसे
कन्यायपंचकांतर्गतप्रतिज्ञादिपंचकेऽतिव्याप्तिः । एवं च घटमानायेत्यादिवाक्यवृत्तिसमुदायत्ववारणाय प्रति
ज्ञादिपंचवृत्तित्वरूपविशेषणदलसार्थक्यं । अत्र च संदर्भविरोधः तादृशभेदप्रतियोगितावछेदकत्वनिवेशेपि
वर्ण न्यायघटककतिपयवृत्तिसमुदायत्ववारणाय प्रतिज्ञात्वादिपर्याप्त्यवछेदकयत्किंचिद्धर्मपंचकव्यापकत्वरू
पविशेष्यदलसार्थक्यस्यावश्यकत्वात् । असंभवश्च येन तादृशभेदप्रतियोगितावछेदकवर्णत्वव्यापकत्वपर्यंतस्य निवेशासंभ
वात् । अत्र केचित्तु तादृशभेदप्रतियोगितावछेदकत्वस्यावछेदकतावछेदकसाधारण्यस्याप्रामाणिकत्वेन तादृशानुपूर्व्यवछेदका
रकनिश्चयत्वसमनैयत्यनैयत्ये कारणतावछेदकयत्किंचिज्ज्ञानीयविषयितानिरूपकवर्णत्वव्यापकसमुदायत्वस्य निवेशासंभवेन १
एकदेशावृत्तिसमुदायत्ववारणे प्रतिज्ञादिपंचवृत्तित्ववैयर्थ्यसंभावनासंभवतीति नैवं चेत्यादिग्रंथसंदर्भविरोधः ॥

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनेद १ ॥ अथप्रतिज्ञानपंचकानुयोगितावच्छेदकं यद्यत्तत्तद्धर्मावच्छिन्नानुयोगिताक[redacted]भेदप्रति
योगितावच्छेदकान्यसमुदायत्वनिवेशनेनोपपत्तौ विशेष्यदले प्रतिज्ञात्वाद्यवच्छिन्नानुयोगि
ताकभेदप्रतियोगितावच्छेदकं यद्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्व
निवेशनं गौरवग्रस्तं न च सत्यं तद्दलेपि प्रतिज्ञादिभेदपंचकानुयोगितावच्छेदकान्यत्वं निवे
छेदकान्यत्वं निवेश्यातिलाघवमेव कुतो न क्रियत इति वाच्यं। प्रतिज्ञादिनिष्ठतावच्छ्णी
न्यतमत्वावारणाय व्यासज्यवृत्तित्वनिवेशनेतिलाघववारणान च विशेषणदले प्रतिज्ञा
त्वाद्यवच्छिन्नानुयोगिताकभेदानुयोगितावच्छेदकत्वमेव वाच्यं तां न पदमपि त्यज्यतामिति
वाच्यं तथा सति प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकघटकभेदादिकमादाय प्रतिज्ञाहेतु
समुदायत्वेऽतिप्रसंगात्॥ भेदकूटनिवेशो चेगौरवात्। अस्माकं तु प्रतिज्ञात्वाद्यवच्छिन्ना
के नुयोगिताकभेदप्रतियोगितावच्छेदकं सामान्यभेदनिवेशनेन लाघवादिति चेन्न। अस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणांतरत्वात् लाघवादरे च प्रतिज्ञालाघव्यतमधर्मवत्वस्य सम्यक्त्वसंभवात् । इति भट्टाचार्य
मतेपि प्रतिज्ञालाघवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वेन तादृशभेदप्रतियो
गितावच्छेदकावच्छिन्नाप्रतियोगितानिवेशनीया अतो न घटत्वादिरूपावच्छिन्नप्रतियोगि
ताकभेदानुयोगितावच्छेदकत्वस्य प्रतिज्ञाहेतुसमुदायत्वे सत्वप्रतिव्याप्तिवारणाय धर्मकूटनि
वेशनमिति ध्येयं । इति न्यायलक्षणं । अथ किं त्रिधर्मावच्छिन्नविशेष्यतानिरूपितशुद्धसाध्यता व
ध च्छेदकावच्छिन्नप्रकारकत्वौजनकत्वमिति अनुषंगपक्षे निगमनवारणाय शुद्धत्वस्यावश्यकत्वा
त् । अथ शुद्धसाध्यतावच्छेदकावच्छिन्नत्वं यदि साध्यतावच्छेदकातिरिक्तानवच्छिन्नत्वं निगम
ने च वह्निनिष्ठप्रकारतातादृशज्ञानज्ञाप्यत्वावच्छिन्नेति तद्व्युदासः । तथा च धूमव्यापकवह्नि व
त्वात्मकव्यापकत्वस्योदाहरणजन्यबोधे भानेपि शुद्धत्वस्य संभवात् । समूहालंबनबोध एव ज २
न्यते न तु व्यापकतावोध्यो पि इति प्राचीनमतावलंबनं संदर्भविरुद्धं । यदि च निरवच्छिन्नसाध्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावच्छेदकप्रकारताकत्वं।तादृशानुदाहरणजबोधेचवह्नित्वस्यस्वरूपतोभानाभावात्तादृशधारावा
नमतावच्छेदकत्वसम्यगित्युच्यते।तदानीगमनेवह्न्यंशएवज्ञानज्ञाप्यत्वस्यभानान्नतद्धारणमितिचेन्न
७ साध्यतावच्छेदकतापर्याप्तिर्यादृशीतादृशपर्याप्तिकप्रकारतावच्छेदकताकप्रकारताशुद्धसाध्यतावच्छे
दकावच्छिन्नप्रकारतेत्यनेनविवक्षिता।अतएववह्निव्याप्यधूमवानित्युदाहरणेपिनातिव्याप्तिः।अथयत्किं
चिद्धर्मावच्छिन्नविशेष्यतानिरूपिततादृशप्रकारताकबुद्धित्वावच्छिन्नजन्यतानिवेशस्यावश्यकत्त
यासवह्निमान्निष्कदाहरणैकदेशएवतादृशजनकत्वमितिन्यायांतर्गतत्वेसतिविभयघटकभागद्व
याघटितत्वमेवन्यायावयवत्वमत्रविवक्षितंतत्रेयमनुपपत्तिः।तादृशबुद्धित्वावच्छिन्नजन्यतानिरूपक
यत्किंचिद्बुद्धिविषयतानिरूपकवर्णसमुदायत्वंनोदाहरणातीत्तीतिकथंतादृशोऽयवर्णानमितिचे रा
न्न।शब्दस्यजनकताभतेतल्लिरचनात्।परन्तुज्ञानस्यजनकताभतेजनकतावच्छेदकीभूतविषयता
श्रयवर्णसमुदायत्वविवक्षणेस्यप्रयोजनविरहात्।सम्भूहालंबनज्ञानमादायउदाहरणज्ञानेवारणा
यमपिपक्षतावच्छेदकानिवेशनसम्यगितिकृततादृशप्रयासेनेतिमुकुलमुपस्यामः।अथैवमवयवाघटकत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दलस्यावयवत्वपर्याप्त्यवच्छेदकयत्किंचिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वावच्छिन्नभिन्नत्वस्यान्यूनातिरिक्त
विषयकज्ञानजनकतायां निवेशयनयावयवघटकेत्यस्य वैयर्थ्यं । न च धूमादालोकानुपूर्वतो वह्निमान्धूमादि
त्यादेः धूमज्ञानज्ञाप्यत्वनिश्चयत्वावच्छिन्नजनकतापि न तत्त्वहेतुत्वरूपयत्किंचिद्धर्मव्यापकविषयताकान्यज्ञानवृत्ति
त्वावच्छिन्नभिन्नेति धूमादिति हेतावतिव्याप्तिरेवेति वाच्यं हेतुसमानाकारकप्रतिज्ञादि घटकधूमादिति भागस्य
हेतुत्वानाक्रान्ततया न द्वर्णविषयकज्ञानस्य हेतुत्वव्यापकविषयिताकान्यनयानवृत्तिजनकताव्यावृत्तेः । अत्रेदं बो
ध्यं । दीधितिकृतामेनादृत्य निश्चायसत्त्वेऽन्यूनपदवैयर्थ्यापत्तेः हेतुमुपेक्ष्य प्रतिज्ञाहेतुसमुदायेऽनतिरिक्त
विषयकत्वदलव्यावृत्तिदानस्य संदर्भविरुद्धत्वापत्तेः । एतेन सर्वमालोच्यैव मद्भट्टाचार्येण वस्तुतस्त्वित्यादिकल्पा
नुसरणं कृतं ॥ इति अवयवसूत्रस्य समाप्तिः ॥ ॥ प्रकृतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितवि
षयतानिरूपितविषयतानिरूपितविषयतानिरूपितविषय तानिरूपितविषयतांशे विशेषणविधयाऽनुमि
तिजनकतावच्छेदकतापर्याप्त्यधिकरणं यद्धेतुव्यापकत्वविशिष्टसाध्यविषयतात्वं साध्याभावव्यापकत्वविशिष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेत्वभावविषयतात्वंचलब्धत्वेनतादृशविषयताद्वयानुगमः कृतः प्रमेयत्वव्यापकवाच्यत्वसमानाधिकरणधू
मवान्पर्वतो वह्निमान्धूमादित्यादौ प्रतिज्ञायामव्याप्तिः धूमव्यापकवह्निसमानाधिकरणधूमवान् प्रमेयत्वव्याप
कवाच्यत्वसमानाधिकरणधूमवान्पक्षः इति परामर्शीयपक्षतावच्छेदककोटिप्रविष्टपंचमविषयत्वांशे विशे
षणविधयानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणं प्रमेयत्वव्यापकवाच्यत्वविषयितात्वं तद्वद्विषय
तावत्वात् तादृशप्रतिज्ञाजन्यबोधस्येति पक्षतावच्छेदकावच्छिन्नत्वनिवेशः। तत्रापि पक्षतावच्छेदकनिष्ठावच्छे
दकत्वविषयताभानादयन्तदोषवारणाय पक्षविषयतानिरूपितावच्छेदकतान्यविषयताभावार्थं तन्निवेशो बोध्यः
मुख्यपदानुपादाने गौरवाभावः प्रमेयत्वव्यापकवाच्यत्ववत्त्वस्तत्त्वाभाववानु गौरवाभावादित्यादौ तादृशजनक
तावच्छेदकतापर्याप्त्यधिकरणप्रमेयत्वव्यापकवाच्यत्वविषयतात्वरूप[redacted]धर्मवद्विषयताकबोधजनकत्व
यातत्रस्य प्रतिज्ञायामव्याप्तिरतस्तदुपादानं। इदं च एकव्यक्तिसाध्यकस्थले भेदघटितव्यापकत्वाभिप्रायेण।
[margin: तावच्छेद] अन्यथा अस्यं ताभावघटितव्यापकत्वानिवेशोऽव्याप्त्यसंयोगह[redacted]। साध्यतावच्छेदकांशे एवतादृशप्रकृतहेतुव्यापक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावच्छेदकत्वावगाहिपरामर्शस्य जनकत्वात्. एवं लिंगविशेष्यकपरामर्शस्य हेतुतायां मुख्यपक्षतानेपथ्यनिस्तारइ
तिपक्षविशेष्यकपरामर्श एव हेतुरिति नव्यमतमेवालंबनीयं। अयं चानुगमप्रकारोऽवच्छेदकतावच्छेदकसा
धारणाकारणतावच्छेदकत्वमंगीकृत्यायं तु तादृशपंचमविषयताया अपि विनिगमनाविरहेणानुमितिजनक
तावच्छेदकतया तादृशानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मानुगमः कर्त्तव्य इति मतं तत्तुच्छं
तथा सति पक्षादिविषयतानिरूपितत्वसहितहेतुव्यापकसाध्यविषयतात्वस्यैव तादृशपर्याप्त्यधिकरणतया
उदाहरणे अतिव्याप्तेर्वज्रलेपत्वात्. अथाऽवच्छेदकतावच्छेदकसाधारणावच्छेदकत्वास्वीकारे नायमनुग
मः साधीयानिति चेन्न। पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिष्ठानुमितिजनकतावच्छेदकतायानि
रूपितत्वसंबंधावच्छिन्नाया अवच्छेदकता तदवच्छेदकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेन धर्मानु
गमस्य करणीयत्वात्. हेतुव्यापकसाध्यविषयताविशिष्टाधिकरणविषयताविशिष्टाधेयत्वविषयताविशि
ष्टहेतुविषयताविशिष्टपक्षविषयताशालिज्ञानत्वेन जनकताया न्यासंगतिः। सर्वत्र वैशिष्ट्यं निरूपितत्वसंबं ४

धेनवोध्यं। संसर्गावच्छिन्नहेतुविषयताविशिष्टपक्षविषयताशालित्वेन हेतुविषयताविशिष्टसंसर्गविशिष्ट विषयता
पक्षविषयताशालित्वेन वा विनिगमनाविरहेणाजनकतया न साध्याभावव्यापकहेत्वभाववविषयतात्वस्यैला
भः। अथ पंचमसाधारण्यानुरोधेन हेतुव्यापकसाध्यविषयतात्वस्यानुमितिजनकतावच्छेदककोटिप्रवेशः ना
किंतु हेतुव्यापकत्वविषयतानिरूपितत्वसहितसाध्यविषयतात्वस्य। तथा च तादृशपंचमविषयतानि
रूपितत्वव्यक्तेरेवानुमितिजनकतावच्छेदकप्रविष्टतया तादृशव्यक्तेर्भिन्नतया तु दाहरणाजन्यबोधीय
विषयतायां तदसत्वेनातिव्याप्तिरस्त्वेवेति तादृशधर्मवद्विषयत्वावच्छिन्नप्रतिबंधकतावच्छेदकविषयता
शून्यत्वमेव विवक्षणीयं। तथा चोदाहरणाजन्यबोधेतादृशधर्मवद्विषयत्वावच्छिन्नप्रतिबंधकतावन्निर्धू
मव्यापकोनवेतिशंकायनिरूपितातदवच्छेदकविषयतावत्वादतिव्याप्तिनिरासः। न च तथासति तादृशं
पंचमविषयत्वावच्छिन्नत्वमेव प्रतिबंधकतायामुच्यतां। किं तादृशधर्मवद्विषयत्वावच्छिन्नत्वमिति वाच्यं।
तथासति गोत्वाभावः प्रमेयत्वव्यापकवाच्यवत् साध्याभाववान् गोत्वाभावादित्यादिप्रतिज्ञायामव्याप्तिः
तत्र तादृशपंचमविषयता। निष्ठप्रतिबंधकतावच्छेदकता साध्याभावः प्रमेयत्वव्यापकवाच्यत्ववान्नवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तित्वांशपनिरूपितप्रतिबंधकतापिभवतीति तादृशधर्मरूपेण तादृशविषयतानिष्ठप्रतिबंधकतावच्छेद
कत्वप्रवेश आवश्यक इति प्रतिबंधकताघटितपरिष्कारः स च न सर्वसम्मतः। तथाहि तादृशव्यापकत्व
विषयतानिरूपितत्वस्य भिन्नत्वेपि निरूपितत्वत्वस्यानुगतत्वया तेन रूपेण तस्य प्रवेशे दोषस्याभावात्
अन्यथा निरूपितत्वस्य भिन्नत्वे भ्रमप्रमासाधारणैकप्रतिबंधकतापि दुर्वचा स्यादिति हेतुविषय
तानिरूपितव्यापकत्वविषयतानिरूपितसाध्यविषयतात्वं अनुगतमेवेति न किंचिदनुपपन्नं॥
॥श्री॥ ॥अथ पक्षमुख्यविशेष्यतामारभ्य यावच्चतुर्थी विषयता तदंशे विशेषणविधया अनुमितिजनकतावच्छे
दकतापर्याप्त्यधिकरणं हेतुव्यापकसाध्यवद्विषयतात्वं यच्च साध्याभावव्यापकहेत्वभावविषयतात्वं तादृशध
र्ममादायापि धूमवान् धूमव्यापकवह्निमान् इत्युदाहरणजन्यबोधवारणासंभवः। एवं च किंचिद्व्यापकत्वविशि
ष्टनिरूपितत्वमपि विषयितायां न देयं एतादृशरीत्या साध्यादेरसंभवादिति चेन्न। एवं सति यत्र धूमस्तत्र वह्नि
रित्यादौ धूमव्यापकवह्निरित्युदाहरणजन्यबोधस्य तादृशचतुर्थविषयताशून्यत्वया अतिव्याप्तेः। अत्रेदमा राम
लोचनीयं। एतन्मते एकधर्मिविशेष्यतापन्नस्यापरविशेषणतापन्नस्य प्रकारतानवविशेष्यतासिका किंतु भिन्ने ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निकत्वमनुगमः। तथाहि अन्वयपरामर्शस्थले पक्षविशेष्यतामारभ्य हेतुव्यापकत्वविषयतानिरूपितसाध्यविषयता
नवमी व्यतिरेकपरामर्शस्थले पक्षविशेष्यतामारभ्याष्टमी साध्याभावव्यापकहेत्वभावविषयतेति पक्षसं
सर्गमादायापि न निस्तार इति चेदत्राहुः। व्यतिरेकपरामर्शस्थले पर्वतपक्षविशेष्यतानिरूपिता सांसर्गि
की विषयता तथा अत्र पर्वतपि सांसर्गिकी विषयता हेतौ प्रतियोगित्वविषयतानिरूपिता प्रतियोगित्वे हेत्वभावनिरू
पिताविषयता धर्मत्वाद् इति न नवमीत्वानुपपत्तिरिति॥ इति पंचमीविषयताविचारः॥ ॥श्री॥ प्रतिज्ञादिप्रतिपा
दनत्तद्विशिष्टार्थविषयकज्ञानपंचकस्यान्यतमत्वेन निवेशे प्रतिज्ञाहेतुसमुदाये ऽतिव्याप्तिः तादृशसमुदाय
जन्यबोधस्यापि तादृशान्यतमघटकत्वे निवेशात्। अथ केवलप्रतिज्ञाद्यर्थविषयकज्ञानव्यक्तीः तत्तद्व्यक्तित्वे
नोपादाय तादृशज्ञानपंचकान्यतमनिवेशान्नैष दोष इति चेन्न। विभिन्नानुपूर्वीकप्रतिज्ञान्यानां प्रत्यानां (?)
एकोपादाने ऽन्यानुपूर्वीकज्ञाने तदजनकतया ऽव्याप्तेः। प्रत्येकमेकैकोपादाने ऽन्यतमत्वशरीरे गौरवं। एवमेक
देशे ऽतिव्याप्तेश्चेदं सालोच्य तत्तदर्थविषयकत्वाद्युपर्याप्त्यवच्छेदकताकजन्यतानामन्यतमत्वेन निवेशः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथैवमपि तादृशादृशाबद्धत्वस्य पर्याप्तिनिवेशे ऽसंभवः। व्यभिचारवारणाय तादृशतादृशानुपूर्व्यवच्छिन्नज्ञानाव्य
वहितोत्तरत्वस्य जन्यतावच्छेदकघटकत्वात्। न च किंचिद्ज्ञानोत्तरत्वसहितत्तत्तद्वर्णविषयकत्वाद्यवत्त्वपर्याप्ति
जन्यतावच्छेदकताकत्वं निवेशनीयमिति वाच्यं। तादृशतादृशवर्णविषयताया अपि जन्यतावच्छेदकघटकतया
तदप्रवेशे न पर्याप्तिसंभवादिति चेदत्र केचित्। यादृशयादृशानुपूर्व्यवच्छिन्नज्ञानस्य हेतुत्वं तादृशतादृशानुपूर्व्य
वच्छिन्नज्ञानाव्यवहितोत्तरत्वसहितत्तत्तद्वर्णविषयकत्वाद्यवत्त्वपर्याप्त्यवच्छेदकताकजन्यतान्यतमत्वेन निवेशः
न चैवं सति तादृशतादृशानुपूर्व्यवच्छिन्नभेदेनान्यतमत्वशरीरे गौरवस्यावश्यकत्वे तत्तदानुपूर्व्यवच्छिन्नज्ञा
नाव्यवहितोत्तरोत्पन्नज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेनोपादानमुचितमिति वाच्यं। तावता प्येकदेशे ऽतिव्याप्त्यादिसा
वास्तविकप्रतिज्ञा यानुपूर्व्यन्यतम याकि। येदानुपूर्वी ज्ञानोत्तरेस्यर्थः।
हुः। परे तु। यत्किंचि ज्ञानोत्तरत्वघटितधर्मसहितत्तत्तद्वर्णविषयकत्वाद्यवत्त्वपर्याप्त्यवच्छेद
कताकजन्यतानामन्यतमत्वेन निवेश इत्याहुः। परं तु मतद्वय एवाव्यवहितोत्तरत्वानिवेशस्यावश्यकत्वे विषय
विषयित्वस्य कार्यतावच्छेदकत्वप्रवेशो निष्प्रयोजनक इति कथं तादृशविषयिताघटितत्वाद्यवत्त्वपर्याप्तिनिवेशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

संभवतीति विभावनीयं। अथ प्रतिज्ञाहेतुसमुदाये प्रतिवाद्यविचारणाय स्वानवच्छेदकविषयिताविशिष्टजनक
ताशून्यत्वं ज्ञाने [illegible]मी निवेशितं। तथा च धूमादालोकवान्पर्वतो वह्निमानिति प्रतिज्ञायामव्याप्तिः तादृशप्रतिज्ञा
ज्ञानस्यापि धूमादित्वानुपूर्व्यवच्छिन्नज्ञानत्वावच्छिन्नजनकत्ववत्वात्. तादृशजनकत्वस्य निरूपकान्यतमजन्यता
निरूपितत्वात्. स्वानवच्छेदकीभूतपर्वतादिपदविषयतावत्वादिति चेन्न। तादृशान्यतमजन्यतानिरूपिताया जन
कतास्वानवच्छेदकविषयताविशिष्टतादृशजनकताशून्यज्ञानीयस्वा[illegible]वच्छेदकविषयितानिरूपकवर्णसमुदाय
त्वमर्थः। तथा च स्वपदं यज्ज्ञानजनकतामादाय यत्र लक्षणसमन्वयः कर्तव्यस्तत्परं। धूमादालोकवान्पर्वतो वह्निमानि दात एव
त्यादिप्रतिज्ञाज्ञानत्वावच्छिन्नाया जनकताया अनवच्छेदकविषयताविशिष्टतादृशजनकताशून्यत्वं तत्प्रतिज्ञाज्ञान
स्यासत्वे तल्लक्षणासमन्वयसंभवादेवानुपपत्त्यभावात्. न चैवं तादृशविषयताशून्यत्वमेवोच्यतां किं जनकतामवे
शेनेति वाच्यं। तथा सति तादृशान्यतमजन्यतानिरूपिताया जनकतायाः स्वानवच्छेदकविषयताशून्यत्वनिवेशो नैवो
पपत्तौ। विषयितायां पुनस्तादृशान्यतमजन्यतानिरूपितजनकतावच्छेदकत्वपर्यन्तस्य विशेषणदलस्य वैयर्थ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्तेः। अस्माकं तु एकदेशज्ञानस्यापि तादृशान्यतमजन्यतानिरूपितजनकतानवच्छेदकप्रमेयत्वसाधारणविषयि
ताविशिष्टतादृशजनकताशून्यतया एकदेशवारकत्वमस्त्येव विशेष्यदलसार्थक्यात्। अत एव तादृशपदमपि सार्थकं। अन्य
था एकदेशज्ञानस्यापि तादृशविषयताविशिष्टयथार्थपरोक्षज्ञानजनकतासत्त्वे विशेष्यदलस्य वैयर्थ्यापत्तेः। यत्तु तादृश
ध्या विषयताशून्यत्वनिवेशेन विषयितायाश्चाव्याप्यवृत्तित्वेनावर्तकमिति जनकत्वपर्यन्तं। विषयिताविशिष्टजनकत्वं च
नाव्याप्यवृत्तिरिति न दोष इति तन्मंदं। तथा सति प्रमेयत्वसाधारणतादृशविषयिताविशिष्टत्वं निवेश्य तच्छून्यत्वनिवे
शेनैवोपपत्तौ तादृशजनकतापर्यन्तवैयर्थ्यस्य वज्रलेपत्वापत्तेः। परे तु स्वत्वस्याननुगततया न प्रतिस्वमादाय अनुगतलक्ष
विषयिता णानिर्वाह इति स्वानवच्छेदकविशिष्टतादृशजनकताविशिष्टं यत्स्वं तदभावकूटस्यैव ज्ञाने निवेश्यत्वं स्थिरं। तत्र हेतु
ज्ञानत्वावच्छिन्नाजनकतानप्रवेश्या। किं तु तदन्यचतुष्टयीति धूमादालोकवानपर्वतो वह्निमानिति प्रतिज्ञायां लक्षणस
मन्वयो नानुपपन्नः। एवं च जनकत्वखंडनमप्रसक्तमेवेत्याहुः तदपि नातिसंदर्भशुद्धं प्रतिभाति। इदृशादौ सैव प्रति
ज्ञाहेत्वादिसमुदायेऽतिव्याप्तिविरहे तत्तदर्थविषयकज्ञानत्वपर्याप्तावच्छेदकतानिवेशस्य व्यर्थत्वापत्तेः। अस्माकं तु राम०
प्रतिज्ञाहेतुज्ञानत्वावच्छिन्नजनकत्वं स्वपदेनोपादाय लक्षणसमन्वयसंभावनावारणाय पर्याप्तिनिवेशनमावश्यकं। स्व ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्किंचित्

त्वाननुगमदोषस्फु[redacted] वदेतल्लक्षणोऽस्वरसमप्यएवेति। अत्र च तादृशायत्किंचिज्ज्ञानीयविषयतानिरूपक
वर्णत्वसममियतसमुदायत्वमेव निवेश्यं। नातः प्रतिज्ञाहेतुसमुदाये तिव्याप्तितादवस्थ्यं। इत्थं चावच्छेदकत्वनिवेशानम
पिसार्थकं। अन्यथा हेतुप्रतिज्ञैकदेशज्ञानसाधारणत्वस्य तत्समुदायेतिप्रसंगः। प्रतिज्ञाद्वयादिकं चलत्वमेव। अलक्ष्यत्वे
चतादृशसमुदायत्वनिष्ठानुनवच्छिन्ना निरूपकत्वं निवेशनीयं। तावतैव प्रतिज्ञाहेत्वादौ दोषवारणसंभवेप्यर्थं स्वानवच्छे
दकेत्यादिविशेषणं। स्वाश्रयं चावच्छेदकपदमिति ध्येयं। यत्तु स्वस्वस्वधर्मितावच्छेदकत्ववारणाय प्रतिज्ञादिज्ञाने पक्षा
दिप्रकारतानिरूपित न विशेष्यताया अभ्युपगमे तादृशप्रकारतायास्स्वानवच्छेदकविषयितात्मिकायाः शून्यत्वविरहेण
प्रतिज्ञायामव्याप्तिः जनकता। वनिवेशे चावच्छिन्नत्वसंबंधेन तद्विशिष्टत्वाभावान्न दोष इति तन्न। अवच्छिन्नत्वसंबंधेन
तादृशविषयतावैशिष्ट्यनिवेशेप दिच्छेत्यादिग्रंथविरोधात्। उदासीनपदार्थविषयतायास्स्वानवच्छेदकत्वेपि तादृ

वच्छेदकत्व

स्य

शज्ञानकस्य तदवच्छिन्नतया व्याप्तेर्योगेन विषयितायां तादृशान्यतमजनकत्वं निवेशस्योन्मत्तप्रलापापत्तेः। प्री
॥ ॥ पक्षविशेष्यकलिंगविषयकशाब्दबोधजनकन्यायावयवत्वमर्थः। ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ व्य
तिरेक्युदाहरणे वारणाय पक्षविशेष्यकेति। उपनयवारणाय लिंगाविषयके ति। पक्षतावच्छेदकावच्छिन्नवि

न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेष्यकत्वपर्यंतविवक्षणे अननुषंगपक्षे निगमने नातिव्याप्तिरिति निगमने व्याप्तिर्न दर्शिता । वस्तुतो गो-
त्वं सास्नाभाववद्वृत्त्यभावादिसाध्यं यत्र सास्ना तत्र गोत्वमित्याद्युदाहरणे पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वलि-
ङ्गविषयकत्वयोः सत्त्वेनातिव्याप्तिः । विश्वपक्षकस्थले [illegible] भयेन पक्षमात्रविशेष्यकत्वस्य निवेशासंभवादि- अप्रसिद्धि
ति । पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताया निरूपकत्वं वक्तव्यमिति । अननुषंगपक्षेऽतिव्याप्तिर्न संभवत्ये-
वेति तदुपेक्षा । अत्रेदं बोध्यं । यत्र समवायसंबंधावच्छिन्नप्रतियोगिताकगोत्वाभावस्य साध्यता कालिकसंबं-
धावच्छिन्नप्रतियोगिताकगोत्वाभावस्य हेतुता गोत्वस्य पक्षता तत्रैव यत्र गोत्वं तत्र गोत्वमित्युदाहरणेऽतिव्याप्तिः
तत्रस्य मुख्यविशेष्यताद्वयस्य पक्षतावच्छेदकीभूतगोत्वत्वानवच्छिन्नत्वासंभवात् । यत्तु मुख्यविशेष्यताद्वय-
शून्यत्वं तदर्थ इति तन्तुच्छं । तथा सति निगमनोपेक्षावीजाभावात् । अत्र केचिदिदं दलि पक्षतावच्छेदकावच्छि-
न्नयत्किंचिद्विशेष्यताभिन्नमुख्यविशेष्यतानिरूपकत्वं वक्तव्यं । अतो न तादृशोदाहरणेऽतिव्याप्तिरिति । न च
यत्किंचित्त्वस्य विशेष्यताभिन्नमुख्यविशेष्यतानिरूपकत्वाभावे नैव विश्वपक्षकस्थलेऽप्रसिद्धिवारणासंभवे रा.म.०
पक्षतावच्छेदकनिवेशानंनावश्यकमिति वाच्यं । अखंडाभाववद्घटकत्वेन सार्थक्यात् । एवमपि तदुदाहरणवारणा ८

निगम

यपक्षतावच्छेदकानिवेशस्यनायरूपकतानिगमनवारणायतन्निवेशे संदर्भविरोध इति यत्तुक्तं तदृत्यादिनानिगम
नोपेक्षाबीजमर्पणं संदर्भविरुद्धमेव। अथ पक्षाविशेषणत्वेन साध्याविशेषणत्वेन यल्लिंगविषयत्वं तदभावस्य वि
पक्षपोदाधिद्रव्यमित्यादावतिव्याप्तिर्दत्ता तत्र पक्षतावच्छेदकविशिष्टविषयतावहिर्भूतत्वनिवेशनेन दोषः। तद्वहि
र्भूतत्वं च पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकविषयताभिन्नत्वं तच्च न दधिविशे[redacted]तायामिति ना शेष्य
व्याप्तिरतोऽपनयविशेषातिव्याप्त्यभिधानमितिसाभासविशेषः। दधित्वप्रकारतानिरूपितसंसर्गतानिरूपकत्व
स्योक्करीत्यादधित्वायच्छिन्नविशेष्यतायामसत्वेनाव्याप्तिवारणयोगादिति चेन्न। प्रकारताविशेष्यतान्तरस्वीकारे
पि तत्र प्रकारतानिरूपितसंसर्गताव्यक्तेर्भेदास्वीकारात्। न चैवं पक्षतावच्छेदकावच्छिन्नविशेष्यताद्वारा हेतुविष
यतायाऽपि तादृशसंसर्गतानिरूपितत्वेनोपनयसामान्यनिगमनसामान्ययोरतिव्याप्त्या संदर्भविरोध[redacted] इति
वाच्यं। तादृशसंसर्गतानिरूपितत्वस्य साक्षान्निरूपितत्वरूपस्य निवेशात्। गंधसमानकालीनरूपवतीत्यादौ गंधा
न देरपि पक्षतावच्छेदकघटकस्य पक्षतावच्छेदकत्वात्। तस्य पक्षतावच्छेदकत्वे पक्षतावच्छेदकपदेन तद्घटकस्यावि
वक्षितत्वाददोषः॥ अथ यथेमन्त्रगोत्वमित्यस्य विचारः॥ ॥श्रीराम ॥८॥८॥८॥८॥८॥८॥८॥८॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०दा०पक्ष श्रीगणेशाय नमः॥ शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगसंबंधावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताका
१ नुमितिं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगावच्छिन्नवह्नित्वावच्छिन्नप्रकारताकनिश्चयत्वव्यापकप्रति
बंधकताकसंशयोपक्षता। अत्र तादृशनिश्चयत्वे स्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकत्वनिवेशे महानसीयवह्नित्वा
वच्छिन्नसाध्यकस्थले महानसीयवह्निमान्न वह्निसामान्याभाववान्वा इत्यादिसंशयासंग्रहः। वह्नित्वावच्छिन्नसाध्यकस्य
ले महानसीयवह्निमान्नवेति संशयस्य पक्षतात्वापत्तिरतो व्यापकत्वपर्यंतं। अन्यथा महानसीयवह्निसाध्यकानुमितौ महा
नसीयवह्नित्वावच्छिन्नप्रकारित्वनिष्ठावच्छेदकताकप्रतिबंधकताकनिवेशे नैव तदुपपत्तिः महानसीयवह्नित्वावच्छि
न्नप्रकारितायामपि वह्नित्वावच्छिन्नप्रकारिताचेन वह्न्यभावबुद्धिप्रतिबंधकतावच्छेदकत्वादिति तत्र महानसीयवह्नि
मान्न वह्निसामान्याभाववान्वेति संशयस्यनासंग्रहः। एवं शुद्धवह्नित्वावच्छिन्नविधेयताकानुमितौ वह्नित्वपर्याप्तावच्छेदक
कत्वं ताकप्रकारितानिष्ठावच्छेदकताकप्रतिबंधकतानिवेशे महानसीयवह्निमान्नवेति संशयस्येति न तत्र तस्य संग्रहः। साध्यता
वच्छेदके प्रकारतावच्छेदकतापर्याप्तिनिवेशेन सामंजस्यात्। एवं चाप्रामाण्यज्ञानानास्कंदितत्वादेर्निवेशोपि विफल इति रा०म०
चेदत्र केचित्। वह्निव्याप्यसाध्यकानुमितौ वह्निव्याप्यधूमवान्नवेति [illegible] संशयस्य पक्षतात्वापत्तिः। भिन्नविषयकानु ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिति सामग्र्याः प्रत्यक्षप्रतिबंधकतया तत्प्रतिबंधकतावच्छेदककोटौ वन्हिव्याप्यत्वावच्छिन्नप्रकारतायाः अपि प्रवेशो न स्वरू
पसंबंधरूपावच्छेदकत्वसत्वात् · व्यापकत्व…ोचबाधादिप्रतिबंधकसमानकालीनवन्हिव्याप्यनिश्चयेपि तादृशनिश्चय
त्वसत्वेन तत्र सामग्रीत्वावच्छिन्नप्रतिबंधकत्वासत्वेन न तादृशसंशयातिप्रसंगः। न च तादृशसामग्रीप्रतिबध्यताभिन्नवि
षयताकप्रत्यक्षत्वादिनैवावच्छिन्ना। तथा च ज्ञानत्वावच्छिन्नप्रतिबध्यतानिवेशादेव नातिप्रसंग इति वाच्यम् · लाघवेनानु
मित्स्यन्यज्ञानत्वेन तत्प्रतिबध्यतावच्छेदात् · यदि च प्रत्यक्षेच्छाकाले ज्ञानांतरवारणाय इच्छाविशेषस्योत्तेजकत्वमंगीकृत्य वि
तदान शिष्यप्रत्यक्षत्वादिनैव प्रतिबध्यता। ज्ञानत्वावच्छिन्नस्य निवेशोप्युपपत्तेरिति [redacted]। परे तु वन्हिमान् महानसीयवन्हि
मानिति ज्ञानकालीनवन्हिमत्पर्वतनिश्चयत्वेन प्रतिबंधकतया वन्हित्वपर्याप्तावच्छेदकताकप्रकारितानिष्ठप्रतिबंधकता
वच्छेदकताकस्य पर्वतो महानसीयवन्हिमान्न वेति संशयस्य वन्हिसाध्यकस्थले पक्षतात्वापत्तिरतो व्यापकत्वं निवेशितं। य
दि च प्रतिबंधकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशादेव नैष दोषः। तावताप्यप्रामाण्यज्ञानानास्कंदितत्वानाहार्यत्वनि
श्चयत्वानां अप्रवेशेन लाघवानपायादिति विभाव्यते। तदापि वन्हिसाध्यकस्थले वन्हिघटोभयप्रकारकसंशयस्य पक्षतात्वा
पत्तिः उभयाभावज्ञानप्रतिबंधकतावच्छेदकताया उभयत्वानवच्छिन्नायाः अपि एकत्र द्वयमिति रीत्या वन्हिघटवानिति ज्ञानी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

यवह्निप्रकारितायां सत्त्वेन वह्नित्वपर्याप्त्यावच्छेदकताकप्रकारितानिष्ठप्रतिबंधकतावच्छेदकताकत्वानाहार्यासंशयस्यापि य
प्रतिबंधकतायां साध्यत्वावच्छेदकावच्छिन्नप्रकारित्वातिरिक्तप्रकारतया प्रकारतात्वेनानवच्छिन्नत्वमपि निवेशनीयं
मतो नैव दोष इति विभाव्यते न चैवं तत्कालीनस्योपि पर्याप्तिघटितत्वेन गौरवं लाघवमावश्यकमिति वाच्यं प्रतिबध्यताव
च्छेदकीभूतत्तत्स्थाने शरीरपदघटितधर्मावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायां साध्यवत्तानिश्चयप्र
तिबध्यतावच्छेदकावच्छिन्नत्वं निवेश्यानंतरं नाहार्याप्रतिबध्यतायां साध्यनिश्चयप्रतिबंधकतानिरूपितत्व
निवेशे वह्निः पर्वतवृत्तिर्न वेति संशयाऽसंग्रहः पर्वतवृत्तित्वाभाववत्ताबोधीयत्वावच्छिन्नप्रतिबध्यतायां बाध
प्रतिबध्यतावच्छेदकीभूतपर्वतवृत्तित्वावगाहित्वावच्छिन्नप्रतिबंधकतानिरूपितायां साध्यवत्तानिश्चय
प्रतिबंधकतानिरूपितत्वाभावात् नाहार्यासंशये साध्यवत्तानिश्चयप्रतिबध्यत्वप्रवेशे च पर्वतत्वावच्छेदे
न वह्निसाध्यतास्थले पर्वतत्वसामानाधिकरण्येन वह्न्यभावं महानसीयवह्निर्वा तादृशावच्छेदेन महान
सीयवह्न्यभावकोटिमवगाहिमानस्य वह्न्यभावज्ञानात् पर्वतः पर्वतो महानसीयवह्निमान्न वेति संशयस्याप
सत्तात्सापत्तिः अतः संशयत्वघटकप्रतिबध्यतायां साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वमि

१०

वेशः। अन्यवह्निव्याप्यसाध्यकस्थले वह्निव्याप्याभावाभावात्मकवह्निमान्वह्निसामान्याभाववान्वेत्यादिसंश
ह्निव्याप्या यस्य पक्षतात्वापत्तिः। तत्र व[illegible]भावाभाववह्नित्वावच्छिन्नविषयतायाः बाधप्रतिबध्यतावच्छेदकत्वात्। न च बाधप्रति
बध्यतावच्छेदक[illegible]तायद्रूपावच्छिन्नविषयतात्वेन तद्रूपावच्छिन्नविषयतात्वावच्छिन्नप्रतिबंधकतावच्छेदकत्वं विव त्मक
क्षणीयं। उक्तस्थले वह्निव्याप्याभावाभावत्वावच्छिन्नविषयतात्वेन बाधप्रतिबध्यतावच्छेदकत्वेऽपि तेनैव रूपेण न वह्निसामा
न्याभावज्ञानप्रतिबंधकतावच्छेदकत्वमतो न दोष इति वाच्यं। अभावव्याप्यवानित्यादौ अभावव्याप्याभावाभाववानभावसा चे
मान्याभाववानित्यादिसंशयस्यावारणात्। तत्राभावत्वावच्छिन्नविषयतात्वेन बाधप्रतिबध्यतावच्छेदकत्वेऽभावाभावज्ञाने
प्रतिबंधकतावच्छेदकत्वोभयसत्त्वात्। न च बाधप्रतिबध्यतावच्छेदकीभूतप्रकारतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं
तद्रूपावच्छिन्नप्रकारितात्वावच्छिन्नप्रतिबंधकतावच्छेदकत्वं वाच्यं। उक्तस्थले चाभावत्वमात्रेन तथात्वेति न तत्रातिव्या
प्तिरिति वाच्यं। तथा सति महानसीयवह्निसाध्यकस्थले महानसीयवह्निमान्वह्निसामान्याभाववान्वेत्यादिसंशयस्यासंग्रहः
तत्र बाधप्रतिबध्यतावच्छेदकतापर्याप्त्यधिकरणं यन्महानसीयवह्नित्वं तदवच्छिन्नप्रकारितात्वेन व
चेदत्र ह्निसामान्याभावग्रहप्रतिबंधकतावच्छेदकत्वाभावादिति केचित्। वह्निव्याप्याभावात्मकवह्निमान्वह्नि भावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामान्याभाववानिति संशयस्य वह्निव्याप्यत्वावच्छिन्नाभावकोटिकत्वसंभवात्. तदभावत्वावच्छिन्नाभावसंशयस्य तदभाव
त्वावच्छिन्नकोटिकस्यानंगीकारात् एवं च तत्संशयपक्षे तत्तन्मिश्रमेव न चैवं वह्निव्याप्यालोकवह्निमान्वा वह्निसामान्या
भाववान्वेति संशयस्य पक्षे तत्वापत्तिरिति वाच्यं व्याप्यवत्वग्राहकसामग्रीकाले वह्न्यभावसंशयानंगी
व कारात् व्याप्याभावप्रकारकव्याप्यस्य ग्रहसामग्र्याः प्रतिबंधकत्वात् वह्निव्याप्यवह्निमान्वा पर्वतः
पर्वतो वह्निमान्न वेत्यादिसंशयस्य संभवेपि वह्न्यभावविषयितायाः व्याप्यवह्नित्वावच्छिन्नविशेष
विषयितानिरूपितत्वाभावादेवाद्वत्तीधकल्पेवारणासंभवात् ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकता
निवेशनं तु न सम्यक् वह्नित्वावच्छिन्नविषयितात्वेन ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकत्व
स्यापि सत्वात् केचित्तु बाधप्रतिबध्यतावच्छेदकतानवच्छेदकं यदवच्छेद्यं तदनवच्छिन्नस्वग्निष्ठविषय
तानिष्ठावच्छेदकतायाः प्रतिबंधकतानिवेशनीया वह्निव्याप्याभावात्मकवह्निविषयितानिष्ठप्रतिबंध भावा
कतावच्छेदकतायां वह्निव्याप्याभाववन्निश्चयप्रतिबध्यतानवच्छेदकवह्नित्वावच्छिन्नत्वात् दोषः एवं च
वह्निसाध्यकस्थले महानसीयवह्निसंशयवारणाय साध्यवत्वेन निश्चयेन विवक्षितत्वे सार्थक्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावेऽपि पर्वतत्वसामानाधिकरण्येन वह्नेः साध्यतास्थले पर्वतत्वावच्छेदेन वह्निः पर्वतत्वसामाना
धिकरण्येन वह्न्यभावमवगाहमानस्य संशयस्य पक्षतात्ववारणाय तद्दलसार्थक्यं बोध्यं।
अभावव्याप्यसाध्यकस्थले च अभावव्याप्याभावाभावात्मकाभावसामान्याभाववानिति
संशयस्य पक्षतात्वापत्तिरपि नास्ति शुद्धाभाववानिति ज्ञानीयाभावनिष्ठप्रकारतायान्निरुक्तयदवच्छेदघटत्व
स्याबाधप्रतिबध्यतावच्छेदकत्वानवच्छेदकतया तदवच्छिन्नत्वस्य प्रतिबंधकतावच्छेदकघटकत्वात् अत्रापि साध्यवत्वनि
श्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशपर्यंतं संदर्भविरुद्धं। साध्यवत्वनिश्चयप्रतिबध्यतानिवेशोऽपि पूर्वस्थ
त लेदोषविरहात्. अथान्यत्र यत्र तत्रापि महानसीयवह्निमत्पर्वतकालीनः पर्वतो वह्निमानित्यादौ पर्वतत्वा
वच्छेदेन महानसीयवह्निसंशयस्य पक्षतात्वापत्तिः। तस्यापि साध्यवन्निश्चयत्वव्यापकप्रतिबंधकताकत्वात्. नत्वो
द्देश्यतावच्छेदकताऽभिन्नप्रकारतावच्छिन्नत्वं प्रतिबंधकतायां विशेषणं देयमिति वाच्यं। महानसीयवह्निमा
न्पर्वत इति ज्ञानस्यापि प्रतिबंधकत्वात् द्वयप्रतिबंधकतासत्वात् इति चेन्न। साध्यतावच्छेदकमात्रावच्छिन्न
त प्रकारतानिष्ठावच्छेदकताकस्य प्रतिबंधकत्वविशेषणात्. परं तु एवं निवेशे स्वरूपसंबंधरूपावच्छेदकत्वक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰दा॰प॰ ल्पएवआधानं॰ व्यापकत्वकल्पनेविशेषगौरवात्॥८॥ ॥श्री॥ ॥तत्साध्यविशिष्टतत्पक्षविषयकत्वानुमिति
१२ त्वादिष्टावच्छेदकताभिन्नावच्छेदकतानिरूपकानुमितिनिष्ठविषयताकत्वमिच्छानुगमकमितिपर्यवसितेवन्यनुमिति
र्जायतांप्रत्यक्षातिरिक्तंज्ञानंजायतामनुमितिर्जायतामित्यादिसकलेच्छासंग्रहेपितत्तत्क्षणानंतरक्षणेऽनुमितिर्जा
यतामित्यादीच्छायाअसंग्रहेणतत्तद्व्यक्तित्वेनतादृशेच्छानांउत्तेजकत्वं। तत्तत्क्षणानंतरक्षणावृत्तित्वनिष्ठावच्छेदक
ताभेदनिवेशेकालांतरीणतादृशेच्छानामुत्तेजकत्वापत्तिः। कालांतरीणानुमितिस्फुरत्तोऽपरइच्छाविषयासिद्धौचेच्छाप
त्तेरयोगात्॰ नचकालांतरीणतादृशेच्छाव्यक्तीनांतत्तद्व्यक्तित्वेनप्रतिबंधकत्वंकल्पनीयमितिवाच्यंअनंतप्रति
बंधकतापत्तेः अस्माकंतुतत्तत्क्षणमतत्वर्जाख्यैकैकव्यक्तेरेवोत्तेजकत्वमिति॰आद्यवान्।तत्तत्क्षणानंतरक्षे
णेऽनुमितिर्जायतामित्यादीच्छानांयत्यत्कालेसत्वेऽनुमितिर्जायतेतत्कालीनतादृशेच्छाभिन्नतादृशेच्छा
त्वेनप्रतिबंधकतापक्षेऽलाघवंतत्तादृशाख्यत्तेरुत्तेजकत्वेतेषांपरस्परविनिगमनाविरहेणगौरवात्।
स नचतत्कालत्वस्यानंतत्वेनविनिगमकाभावेनतत्तद्भिन्नतादृशेच्छाप्रतिबंधकपक्षेविशेषगौरवमस्त्वे रा॰म॰
वेतिवाच्यं।नतादृशाभिन्नतादृशेच्छात्वेनप्रतिबंधकत्वकल्पनस्यनानत्वापिसमीचीनत्वादितिचे १२

रूपितकारणतावत्वात्. बाधवारणाय व्याप्तिप्रत्यक्षमात्रवृत्तित्वधर्मावच्छिन्नत्वं कार्यताविशेषणं। नचव्या
प्तिप्रत्यक्षमात्रवृत्तिकार्यतैवकुतोन विवक्ष्यत इतिवाच्यं। कार्यभेदेन कार्यताभेदे बाधतादवस्थ्यात्. नचतथापिव्या
प्तिविशिष्टवैशिष्ट्यबुद्धिनिष्ठतत्तद्व्यक्तित्वावच्छिन्नकार्यतामादायबाध इतिवाच्यं। सकलतद्व्यक्तित्वेनतादृशध
र्मस्यविशेषणीयत्वात्. अथ व्याप्तिप्रत्यक्षत्वावच्छिन्नकार्यतैवकुतोलाघवान्नविनिवेश्यतामितिचेन्न। व्याप्तिविषय
कत्वविशिष्टप्रत्यक्षत्वावच्छिन्नकार्यतानिरूपितकारणताखंडनेपिप्रत्यक्षत्वविशिष्टव्याप्तिविषयकत्वाव
च्छिन्नकार्यतानिरूपितकारणतायास्खंडनानंतरं नैयायिकपराभव इतितत्रयद्धर्मानुगमय्यतदवच्छिन्नका
र्यतानिरूपितकारणतानिराकरणात्. नचतथापिकार्यतायांबुद्धित्वानवच्छिन्नत्वनिवेशेचबाधवारणायध
र्मानुगमस्यसंभवतीतिवाच्यं। विनिगमकाभावेनबाधत्वविशिष्टव्याप्तिविशिष्टवैशिष्ट्यविषयकत्वावच्छिन्न
कारणतामादायबाधापत्तेः। जन्यत्वावच्छिन्नकार्यतानिरूपितकारणत्वावच्छिन्नकारणतामादायबाधापत्तेश्च।
यत्तु व्याप्तिविषयकप्रत्यक्षत्वावच्छिन्नप्रतीतिविषयस्यहेतुतायांवास्तवव्याप्तिविषयत्वं जन्यतावच्छेदकेनि
विष्टं। भूयोदर्शनजन्यतावच्छेदकेचभ्रमप्रमासाधारणव्याप्तिप्रत्यक्षत्वमितिकथमेकरूपेणोभयोर्निवेश इति

ग०रा०पक्ष०
१५

श्रीगणेशाय नमः ॥ ॥ साध्याभावनिश्चयत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यताशालिसंशयः पक्षता । व
न्हिव्याप्यादिसाधकस्थले वन्हिसंशयस्य पक्षतात्ववारणाय प्रतिबध्यतायां पक्षतावच्छेदकाघटकसाध्यविषयि
ताव्याप्यत्वं प्रतिबध्यतायां देयं । तत्र पक्षतावच्छेदकाघटकत्वं पक्षतावच्छेदकविशिष्टविषयित्वाघटकत्वं तच्चवि
षयिविशेषणं । तद्विशेषणोपादानात् वन्हिव्याप्यवत्त्वधर्मापर्वतो वन्हिव्याप्यवानित्यादौ न ताद्दशपक्षे वन्हिसंश
यस्य पक्षतात्वं । अत्र वन्हिव्याप्ये पक्षे वन्हिव्याप्तिसाध्ये वन्हिव्याप्यविषयिताघटकसाध्यविषयिताप्रसिद्धेः ॥ न च
पक्षसाध्यभेदेन पक्षताया भिन्नतया तत्र तद्विशेषणं न देयमिति वाच्यं । तथा सति तत्रैव वन्हिव्याप्यवन्हिमान्नवेति
संशयस्य पक्षतापत्तेरिति चेन्न । पक्षतावच्छेदकविशिष्टमुख्यविशेष्यताघटकस्य च । क्रमव्यत्यादिस्फुरत्ये य
तत्र प्रतियोगितासंबंधावच्छिन्नप्रकारताव्यक्तौ विवक्षितात्वं ताद्दशमुख्यविशेष्यताघटकत्वालुक्षपासमन्वयः न वा
वन्हिव्याप्यवन्हिमान्नवेति संशयेतिव्याप्तेः । प्रभाकरमतेऽनुमित्सुत्तरं साध्यानुमितिर्भवतीति तन्मते पक्षताया अहेतु
त्वं । तत्राधिनस्यद्रवस्य परामर्शादन्यत्रानुमितिव्यक्तीनां पुनरुक्तत्वान्तद्वारणाय तत्संसर्गाभावव्यक्तीनां हेतुत्वापि रा०म०
स्यमिति । नैयायिकानां तु सिषाधयिषाकालीनानुमितिव्यत्त्यनुमितित्ववारणायैव तत्संसर्गाभावव्यक्तीनां हेतुत्वानु १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाघवादन्यत्रपक्षताविरहेपावारणादित्तिद्दिंकेतं अत्रेदंबोध्यं यदिवन्हिमान्वन्हिव्याप्यवांश्चेतिसमूहालंबनःप
रामर्शः ततः वन्हिव्याप्यानुमितिः वन्ह्यनुमितिद्वयंचजायतामितीच्छा ततोवन्हिमान्वन्हिव्याप्यवानित्यनुमित्यात्मक
परामर्शः तत्रेयमनुमितिस्ताद्दशानुमितिकाले पूर्वजातसमूहालंबनात्मकवन्ह्यनुमितेः पुनरापादनंमत्कृतं तन्नसं
भि गच्छते। ताद्दशानुमितिकारणीभूतव्याप्यसाध्यस्यपरामर्शनीयत्वात्‌। यदिचापेक्षाबुध्यात्मकतयातस्याःस्थितिः कल्प्य
तेतदानुमित्यात्मकपरामर्शस्यापनासंगतेः। नचवन्ह्यनुमितित्वावच्छिन्नस्यापादनवन्हित्वसामान्यतोवन्ह्यनुमितित्वे
नतत्करणानाशे आपादनसंभवात्समानजनीयस्यकार्यस्यसमानांतर्गतयत्किंचिद्विशेषकारणमुत्पादासंभवादिति।
अत्रकेचित्‌। यत्रवन्हिव्याप्यवन्हिवन्ह्यभावावच्छिन्नपक्षेसामान्यतोवन्हिव्याप्यपरामर्शः ततोऽनुमितिद्वयंजा
यतामितीच्छा ततः ताद्दशपक्षेसामान्यतोवन्हीतरबाधवशाद्वन्हेरनुमितिः ततः ताद्दशानुमितेः पुनरुत्पादनेता
त्पर्यमितिनानुपपत्तिः अत्रेदंचिंत्यं तत्परामर्शकालेतदनुमितिवारणायतदनुमितित्वपरामर्शत्वेन हेतुत्वे
नतदनुमितिव्यक्तिकारणीभूतपरामर्शनाशात्कथमनुमित्यापादनं। यदिचताद्दशस्थलेतत्तदनुमितिंप्रतित
त्परामर्शत्वेनकारणत्वंनास्तिताद्दशस्थलीयदोषासंग्रह इति तदाताद्दशाकुसृष्टिंविनाप्यनुपपत्तिः॥ श्री॥ श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० परा० १६

॥ श्रीगणेशाय नमः ॥ परामर्शं हेतुत्वेनेति । मूलं परामर्शो व्याप्तिज्ञानद्वयस्य हेतुत्वेनेत्यर्थः कुमताचार्या आहुः । अयं दे
धूमवान् पर्वत इति उद्बोधकं तत धूमो वह्निव्याप्य इति स्मरणं ततो धूमवान् पर्वत इति परामर्शः एवं क्रमेणैव सर्वत्रानु वह्निव्याप्य
मीयते । परामर्शो जायते इत्यभिमानपरतया च ग्रन्थं व्याकुर्वन्ति । अत्रेयमनुपपत्तिः । एवं विधाभिमानेपि धूमवान् प
र्वत इति ज्ञानस्य परामर्शपूर्वमपेक्षितत्वेपि तस्य अनुमित्यव्यवहितपूर्ववर्तित्वं नैयायिकसम्मतं तस्य परामर्शकाले
नाशात् । तथा च कथं कल्पनालाघवमिति । अत्र केचित् सर्वत्रैव पक्षधर्मताज्ञानं अपेक्षाबुद्ध्यात्मकं जायते इत्यभिमानं त
संगमयन्ति । नन्वेवं अपेक्षाबुद्धेर्द्वितीयक्षणे विशेषगुणानुत्पदस्य महाचार्यसम्मतत्वात् । केचित्तु पक्षधर्मताज्ञा
नसमयनकालीनव्याप्तिज्ञानं हेतुरित्याहुः । मीमांसकमतं तादृशसमानकालीनत्वं च तथा कारणतावच्छेदकमिति ना उपलक्षणा
दृशकारणस्य अनुमितिपूर्ववर्तित्वं नैयायिकसिद्धमेवेति अत एव पक्षधर्मताज्ञानोत्पत्तिकाले व्याप्त्याभाने तृतीयक्ष त
णे बाधनाशेन तेनोपि तेषामनुमितिरिति वदन्ति । अयमपि कल्पः तदासाधुः यदि पक्षधर्मताज्ञानं नाशोऽपि तु फले
स्याति मीमांसकलिखितान्यवगतिः । अत्र ग्रन्थे च पक्षधर्मताज्ञानस्य कारणतया पूर्वसत्तापेक्षणात् कारणताव
च्छेदकत्वेपि च कारणतावच्छेदकस्य पूर्वभावापेक्षणस्य लिखितत्वात् । परे तु पक्षधर्मताज्ञानं व्याप्तिस्मरणं वा राम०
नुमितिकारणं अत एव च तत्करणमित्यादि अभिमानेनायं ग्रन्थः । तथा च स्वजन्यव्याप्तिस्मरणसम्बन्धेन पक्षध १६
घे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मताज्ञानं यन्मीमांसकानां कारणं तन्नैयायिकानामनुमितिपूर्वदशेवइत्यभिमान इति वदंति द्रव्यत्वसामानाधिकर
ण्येन व्याप्तिज्ञानाद् द्रव्यत्वेन जलावगाहिपक्षधर्मताज्ञानाद्ध्रदे वह्निरित्यन्यथाख्यातिवारणाय यद्धर्मावच्छेदेने स्फुरतं·
द्र अत्रापरमालोचनीयं। एवमपि धूमो वह्निव्याप्यः धूमवद्द्रव्यमिति ज्ञानोत्पत्तेर्ह्रदे वह्न्यनुमित्यापत्तिं समानप्रकारकत्वे
न कार्यकारणभावस्य मीमांसकसंमतत्वात् समानविशेष्यताप्रत्यासत्त्या पक्षधर्मताज्ञानं कारणताबलात्तादृशापत्ति
वारणासंभवादिति चेदत्र केचित् पक्षधर्मताज्ञानानुमित्योः समानविशेष्यकत्वाभिप्रायेणैवायं ग्रंथः। अत एव भट्टाचा
र्येण पश्चात् व्याप्यतया पक्षधर्मतया चावगतस्य समानविशेष्यकत्वं व्यक्तीकरिष्यत इति परामर्शविचारः॥ श्री॥ श्री॥॥
स्वानिरूपकज्ञाने निरूपितविधेयतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं समानकालीनत्वधर्मितावच्छेदकताप
न्नयधर्मविशिष्टे तद्रूपावच्छिन्नविषयताकत्वाद् बुद्धिर्यासाज्ञायमानत्तद्विशेषणजन्येति व्याप्तिः स्वसमान
वच्छेदकता कालीनत्वधर्मितापन्नधर्मावच्छिन्नविषयत्वमिति धूमवान्पर्वतो धूमसमानकालीनवह्निमांस्त्यालोकलिंगि नवह्निना
कार्यासमूहालंबनानुमितौ धूमाजन्यायां व्यभिचारः। तदीय धूमसमानकालीनवह्नित्वावच्छिन्नविधेयता
याः स्वानिरूपकज्ञानानिरूपितत्वेपि तदवच्छेदकतापर्याप्त्यधिकरणं न समानकालीनत्वधर्मितावच्छेदकता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्र पन्नं शुद्धवह्नित्वावच्छिन्नविधेयतायाः स्वानिरूपकेणसमूहालंबनवह्न्यनुमितिस्वरूपेणानिरूपितत्वात्. तत्रहेतुसत्वा
त्. यत्तु विधेयत्वं तदवच्छेदकीभूतसमानकालीनत्वधर्मितावच्छेदकतापन्नधर्मावच्छिन्नं च यद्विषयत्वं एकविशेषविशे
श्र षणतानिरूपितं तदुभयविषयताश्रालिंगात्वबुद्धित्वं हेतुरिति नोक्तसमूहालंबने व्यभिचारः। तत्रविशेष्यताद्वयसत्वा
त्. अनुमितौ विधेयताभेदेनैव विशेष्यताभेदमतेनेदं। अन्यथा कल्पद्वये एकत्रद्वयमिति रीत्या तादृशानुमितिमादाय
व्यभिचारस्यदुर्वारत्वापत्तेः तन्नोक्तत्वात् सति पक्षधर्मिविशिष्टे सत्यवैयर्थ्यापत्तेः। धूमवान्धूमसमानकालीनवह्निमा
न्पर्वतो वह्निमानित्यनुमितौ व्यभिचाराप्रसक्तेः। तत्र धूमसमानकालीनवह्नित्वावच्छिन्नविषयतायाः पर्वतत्वमात्रा
न वच्छिन्नविशेष्यतानिरूपितत्वे वह्नित्वावच्छिन्नवि[illegible]यतायाः धूमधूमसमानकालीनवह्निमत्पर्वतत्वावच्छिन्नविशे धे
वे ष्यतानिरूपितत्वेन तदुभयविषयताया[illegible]कविशेष्यतानिरूपितत्वाभावात्. न च धर्मितावच्छेदकतारूपधूमसमानका
लीनत्वावच्छिन्नविषयतायाः शुद्धवह्नित्वावच्छिन्नविधेयतायाश्चैकधर्मितानिरूपितत्वमस्त्येवेति न पक्षधर्मविशिष्टे
सत्यवैयर्थ्यमिति वाच्यं। एवमपि विषयि[illegible]तायां धर्मितावच्छेदकताभेदनिवेशे नैवोपपत्तौ पक्षधर्मविशिष्टे सत्या
नतिप्रसक्तत्वात्. अस्माकं तु धर्मितावच्छेदकताभेदनिवेशेपि शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसमान
कालीनवह्नित्वावच्छिन्नविषयतायाः स्वपदेनोपादानसंभवेन हेतुसत्वात् व्यभिचारप्रसक्तिरिति। पक्षधर्मिविशिष्टे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्पनवैयर्थ्यं। अप्येकविषयतानिरूपितत्वनिवेशकल्प्ये यत्र धूमधूमसमानकालीनवन्हिवन्हीनांत्रयाणांशुद्धपर्वत
त्वावच्छिन्नोद्देश्यतावच्छेदकतातत्रवन्हित्वावच्छिन्नविधेयतासमानकालीनवन्हित्वावच्छिन्नत्वयोरेकविशेष्यतानिरूपि विषय
तत्वं तत्र व्यभिचारवारणाय पक्षधर्मविशिष्टे स्वस्वसाध्यस्यमितिचेन्न। उद्देश्यतावच्छेदकप्रविष्टवन्हीनां विधेयतानंगीका त्व
रात्। इदं त्ववधेयं। किंचिद्विशिष्टविशेषणत्वस्य पक्षधर्मे निवेशावश्यकत्वेन धर्मे यत्पर्यंतर्भावो विफलः। न च समानका
लीनत्वद्वितीयसत्पदार्थनिवेशो नास्तीति अत्रावश्यकः। अन्यथा नियमशरीरानुपपत्तिरिति वाच्यं। तथा सति धूमवान्प
र्वतो वन्हिमान्नालोकादिसाध्यव्यभिचारापत्तिः समानकालीनत्वद्वितीयसत्पदार्थांतर्भावस्यावश्यकत्वादिति॥ ॥इति लिं
गकरणताविचारः॥ श्री॥ ॥यादृशरूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकनिश्चयत्वं प्रकृतसाध्यकानु
मितित्वघटितधर्मावच्छिन्नतत्कालीनतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं तादृशरू
पनिष्ठविषयतात्वव्यापकान्वयव्याप्तित्वावच्छिन्नविषयतात्वकानुमितिफलोपहितकरणत्वं केवलान्वय्यनुमानत्वं। ता
दृशं च रूपं अन्वयव्याप्तित्वावच्छिन्नमेव। तादृशकारणतावच्छेदकत्वं चानतिरिक्तवृत्तित्वं। तेन जलं निर्गंधं पृथ्वी
त्वव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादौ नाव्याप्तिः। अन्यथा स्वरूपसंबंधरूपावच्छेदकत्वप्रवेशो यादृशरूप
पदेन तादृशव्यतिरेकव्याप्तिमात्रयत्तद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकीभूततादृशव्याप्तिस्वरूपावच्छिन्नप्रकार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰दी॰ केव॰
१८

ताकस्यस्य स्वरूपसंबंधरूपावच्छेदकतया तादृशरूपविषयताया अन्वयव्याप्तित्वावच्छिन्नविषयतात्वविरहेणाव्याप्ति
त्वप्रसंगात्। ईदृशयुक्त्या धूमत्वमादाय दोषसंभवेपि किंचिन्निरूपितव्याप्त्यात्मकयद्रूपविवक्षणेन दोष इति। धूम
त्वहेतुतावच्छेदकस्थलेमुपेक्षितं। वन्ह्यभाववान् वन्हिव्यापकीभूताभावप्रतियोगिमत्वादित्यादौ वन्हिव्यापकीभूताभा
वप्रतियोगित्वरूपयादृशधर्मावच्छिन्नतादृशप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताकनिश्चयत्वस्य तादृशाकार
णतानतिरिक्तवृत्तित्वेपि प्रकृतहेतुतावच्छेदकावच्छिन्नविशेषणतापन्नयादृशरूपावच्छिन्नप्रकारताकनिश्चयत्व
स्य जनकतानतिरिक्तवृत्तित्वविवक्षणान्न दोष इति भट्टाचार्याः। अत्रेदं बोध्यं वन्हिव्यापकीभूताभावप्रतियोगित्वा
वच्छिन्नविशेषणतापन्नवन्हिव्यापकीभूताभावप्रतियोगित्वावच्छिन्नप्रकारकनिश्चयत्वस्यापि तादृशजनकतानति
रिक्तवृत्तित्वात् तत्राव्याप्तिपरिहाराभावः एतदस्वरसेनैव वस्तुतस्त्वित्यादिकल्पानुसरणं। तत्र मते केवलसाध्याभाव
व्यापकाभावप्रतियोगित्वप्रकारकज्ञानस्य हेत्वभावप्रतियोगितावच्छेदकानवगाहितया जनकत्वाभावेन यादृशरू
पपदेन साध्याभावव्यापकाभावप्रतियोगित्वादिरूपादानासंभवात्। अत्र यादृशरूपावच्छिन्ने तत्र यादृशरूपपदे
न व्याप्तित्वावच्छिन्नोपादाने धूमवान् वन्हेरित्यादौ अन्वयव्याप्तिभ्रमदशायां केवलान्वयित्वानुपपत्तिः। तत्र व्याप्ते

ग॰ म॰
१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इति परामर्शवादः समाप्तः॥ उपलक्षणस्येव परिचायकत्वेन प्रसिद्धं तथा परिचायकत्वाप्रतिक्षेपेन लिंगमेव विशेषणमिति वि
शेषणत्वोपगमान्मूले उ संगतिः न च परिचायकत्वप्रतिक्षेपप्रकरणवायं ग्रंथः अग्रेतनस्य इंद्रियसंयोगपरिचायकत्वाभिधानस्यासं
गतेरतः उपलक्षणविशेषणसाधारणपरिचायकत्वपरतां प्रकृते दर्शयति परिचायकत्वमिति परिचायकत्वमन्यथासिद्धिप्रयोजनक
त्वेनाभिहितमिति तन्निराकरणमाकांक्षितमतः परिचेय इत्यादेरुपलक्षणतया परिचायकत्वनिराकरणपरतामाहतत्त्वेतिवि
शेषणमपि परिचायकत्वेनान्यथासिद्धमेव इत्याशंकायां अन्यथासिद्धिप्रयोजकं उपलक्षणतया परिचायकत्वमेव इति स्फुटीक
र्तुं तथा चेत्यादि मूलमवतारयति विशेषणतयेति विशेषणतयेति न त्वे परिचायकत्वे अवच्छेदकतया अन्यथासिद्धिरुपलक्षणत
ये च विशेषणतयापि परिचायकस्याविशिष्टेत्याशंकायामन्यथेत्यादि प्रतिवेदिमवतारयति अवच्छेदकतयेति मात्रपदेन विशे
षणत्वस्याप्रयोजकत्वमुक्तं ज्ञायमानलिंगजन्यत्वसाधकानुमाने विशेषणजन्यत्वेन सामान्यतः साध्यत्वे पक्षतावच्छेद
कादिजन्यतया अर्थान्तरं अनुमितौ व्यभिचारवारकानां हेतुविशेषणानां च वैयर्थ्यं सर्वत्रैवानुमितौ किंचिद्विशेषणजन्यत्वेन
साध्यसत्वात् धूमजन्यत्वेन साध्यत्वे दृष्टांताभिधानविरोध इत्यतः सामान्यव्याप्यापक्षधर्मत्वावलाद्धूमजन्यत्वसिद्धिरिति
प्रदर्शयन् पदप्रयोजनमाह। यायदिति समानकालीनतयेति विषयतारूपवैशिष्ट्यं तृतीयार्थः तस्य बुद्धावन्वयः तादृशी अग्रादृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.दा.
१

पक्षधर्मताबलसंपत्तये धूमजन्यत्वसिद्धोपयिकविशेषणाभाववद्धूमकालीनत्वावगाहित्वघटितहेतोः पक्षधर्मत्व
लाभायानुमितौ धूमस्याविशेषणत्वेन कालीनतायावन्त्यावभासे च तत्र तादृशहेतुसत्त्वानिर्वाहादिति भावः॥ धूमविशेष
णिकेसाध्वीति आदिपदात् धूमसमानकालवह्निविषयेऽप्यस्य परिग्रहः एवं च धूमविशेषणिके तिमूलस्य यथा हेतुव्याख्यानं
विशेष्ये धूमविशेषणिके साध्यर्थकत्वमवसेयं। तादृशस्य यथा व्याख्याय धूमविशेषणकत्वस्यानुभविकत्वप्रदर्शनायेति॥
अन्यथा तत्र प्रमाणानुयोगानिवृत्तेरिति भावः। धूमवानित्यादीति धूमवान्वह्निमानित्याकारकज्ञानमित्यर्थः॥ ननु साध्ये विशे
षणस्य ज्ञायमानत्वं कथं न तेन रूपेणाजनकतासिद्धये प्रत्यक्षविशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकस्य विषयविधया वहे
तुत्वस्य सर्वमतसिद्धतया ज्ञायमानत्वेन हेतुताया अस्थिराया दृष्टान्तविरोधेन दूषणत्वच्छिन्नजन्यत्वस्य साध्यत्वासंभवादिति
तद्वैयर्थ्यमित्यत आह ज्ञायमानेतीति न ज्ञानस्य लिंगज्ञानस्य जनकत्वलाभाय जनकत्वे एतदनुमतत्वलाभाय ननु तद्वि
शिष्टजन्यत्वस्यासिद्ध्या तस्य जनकत्वसिद्धये इत्यर्थः तत्राविवादात् साध्यविशिष्टानुमितेरिति यद्यपि यद्विशेषणकत्वमात्रस्यास्ताद
बुद्धिविशेषणत्वे पक्षतावच्छेदकादिविशिष्टविषयकानुमितेः पक्षतावच्छेदकाद्यजन्यतयापि व्यभिचारः प्रसज्यते तथाप्युद्देश्य
तावच्छेदकविशिष्टे यद्विशेषणकत्वसत्त्वे न तथाऽव्यभिचारः इति साध्यमात्रोपादानं धूमेति धूमस्यातीतनत्वाभन्नमित्यजनकत्वं स्फुट १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतं धूमध्वंसस्य हेतुत्वानुसरणं विशेष्यविषयकत्वस्य बुद्धिविशेषणत्वेपि दर्शितव्यभिचारस्य दुर्वारतया विशेष्यविषये यद्विशे
षणं तत्समकालनयेतियोजना मादस्याभावश्च विशिष्टेतीति मुख्यविशेष्यतानिरूपितविशेषणतयाऽवच्छिन्नाया विशेष
णांतरांशे भासमानसमानकालीनकालीनत्वविषयतानिरूपिता यदीयविशेषणतातत्प्रतियोगीत्यर्थः धूमवान्पर्वतो वह्नि
मानित्याद्यनुमितौ वह्न्यंशे भासमानसमानकालीनत्वप्रतियोगितया हेतुभाने धर्म्मिपारतंत्र्येणावनतुल्यात् तंत्र्येणाधूम
कालीनवह्निमानित्याकारकतापत्तेः तत्पारतंत्र्येण भाने च तन्निरूपितविशेषणतावच्छिन्नविशेषणत्वमिति तादृशानुमितेर्यत्त
पदोपादेयधूमघटितहेतुमत्वमथात्तं यत्तु एकधर्म्मिपारतंत्र्येणान्यांशे विशेषणत्वं तद्धर्म्मिनिरूपितविशेषणत्वाभिन्नविशेष
णत्वमेव तथा चावच्छिन्नत्वस्थले अभेद एव निवेशनीय इति तदसत् तथा सति तत्र यत्ता विशिष्टप्रतियोगिकवैशिष्ट्यबुद्धाव
पि विशेषणपारतंत्र्येण विशेष्यांशे परंपरासंबंधेन विशेषणतावच्छेदकभानस्य विशेषणानिरूपितविशेषणत्वाभिन्नवि
शेष्यनिरूपितविशेषणतात्मकतया धूमकालीनवह्निमान्पर्वतो धूमध्वंसादित्यादिस्थलीयधूमाजन्यानुमितेः पर्व
तनिरूपितप्रकारत्वाभिन्नसमानकालीनत्वविषयतानिरूपितधूमनिष्ठप्रकारताप्रतियोगित्वेन व्यभिचारस्य दुर्वारताप
त्तेः अस्मन्मतेन तु मुख्यविशेष्यांशे या धूमीयप्रकारता सा विशेषणांशे प्रकारतयाऽवच्छिन्ना न तु वैपरीत्यमिति व्यभिचारानव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० ५
२

काशः मुख्यविशेष्यांशे याविशेषणतातन्तसामानाधिकरण्यमपेक्ष्य तदवच्छिन्नत्वनिवेशनस्य मुख्यविशेष्यतानिवेशनस्य च
प्रयोजनमाह तदानीमिति धूमस्य मुख्यविशेष्यांशे विशेषणताभावविषकर्त धूमवान् इत्यसे तं पक्षविशेषणं वर्तमानवैशिष्ट्यस्य म
तुयाप्रायशो बोधनात् तदानीमित्यनुक्तौ धूमस्यानुमितिसमये विद्यमानतालाभसंभवात् स्थलत्रजनकत्वमपि संभाव्येनेति तदुक्तिः
विशेषणम् इति वह्निविषयतानिरूपितसमानकालीनत्वसंसर्गावच्छिन्ना धूमविशेषणताविशेषणीभूतकालनिरूपितवि
शेषणतावच्छिन्नेवन्तु मुख्यविशेष्यतानिरूपितविशेषणतावच्छिन्ने सर्थः इदं च विशेषणविशेषणस्य विशेषणघटित
परंपरासंबंधेन तद्विशेष्यांशे विशेषणत्वमित्याशयेनोक्तं ननु पर्वतविशेषणतापन्नस्य धूमस्य कालीनत्वसंबंधेन विधेयांशे वि
लक्षणप्रकारत्वमेवासिद्धमिति कथं तस्य हेतुघटकत्वमित्यत आह तत्र भवेनिअयमपाशयः एकत्रद्वयमिति रीत्या दंडकुंडल
वैशिष्ट्यावगाहिज्ञानविलक्षणेन योरेकविशिष्टपरवैशिष्ट्यज्ञाने विशेष्यतावच्छेदकधर्माधिकरणतावन्निष्टतदवच्छेद
ककालावच्छिन्नाधिकरणताकत्वं विधेये भासते अनयोरेवासमानकालीनयोरेकविशिष्टेऽपरवैशिष्ट्यज्ञानस्याप्रमात्वं निरूक्तरू
पमेव च समानकालीनत्वमित्युच्यते यथा क्रन्तस्पधर्म्यन्तरएव समानकाले वर्तमानयोरतिप्रसक्तनयाता दृशयोस्तथाविधज्ञा
नेऽप्रमत्वानिर्वाहकत्वात् निरूक्तसमानकालीनत्वभानोपगमेच तद्रूपविशिष्टविधेयवैशिष्ट्यस्य धर्म्यन्तरएवसत्वेनाप्रमाधर्मि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कज्ञानस्य तदवगाहित्वेनाभ्रमत्वोपपत्तेः समानकालीनत्वस्य नियतोपस्थितिविरहेण संसर्गतयैव भानमुपेयं अनुपस्थितस्य विशेष
णत्वायोगात् एवं च दंडी कुंडली स्यादिति विशिष्टवैशिष्ट्यबोधस्य दंडकालीनकुंडलीस्याकारकतावारणाय प्रकारतावैलक्षण्यमावश्यकं य
दि च लाघवाद्विशिष्टवैशिष्ट्यबोधे निरूढाधिकरणतैव विधेयस्य संबंध इत्युच्यते ॥ तदा तदनुसारेणान्यथैव हेतुनिर्वाच्य इति पक्ष
तावच्छेदकसाध्ययोश्च सामानाधिकरण्यमात्रमनुमितिविषयः न त्वेकविशिष्टे परवैशिष्ट्यमिति प्राचीनमतानुसारेण पक्षतावच्छेद
कावच्छिन्नाधिकरणत्वरूपमेव तद्विशिष्टानुयोगिकवैशिष्ट्यं भासते न तु निरूढत्वरूपसिद्धे नाप्येण सभिदमनुमानं नातः पक्षतावच्छेदकमादा
यकापि व्यभिचार इत्यग्रे व्यक्तीभविष्यति विशेष्यविषय इत्यस्य व्यसासमसहमानः प्रकारांतरेणाहेतुव्याख्यानमुपक्रमते विशेषणा
मिति धर्मितावच्छेदकं स्वधर्मितावच्छेदकं विधेयविधेयतावच्छेदकावच्छिन्नं विशेष्यविषय इति सत्समासः तच्छब्दान्वयि विधायितया
र्थकतया विधेयतावच्छेदकावच्छिन्नं स्वधर्मितावच्छेदकयद्धर्मसमानकालीनतयावगाहते या बुद्धिरित्यर्थो लभ्यते तत्र च धूमका
लीनवह्निमान् पर्वतो वह्निमान् धूमध्वंसादित्यादौ व्यभिचारवारणायोपात्तं स्वधर्मितावच्छेदकत्वं धर्मविशेषणमभाव
र्त्तकं धूमादेः ज्ञानांतरमेव तस्य वह्नित्वावच्छिन्नधर्मितावच्छेदकत्वात् स्वनिरूपिततज्ज्ञानीयधर्मितावच्छेदकतानिवेशेनापि न
त्रैव धूमस्याधिकस्य पक्षतावच्छेदकप्रवेशेनाव्यभिचारात् द्वितीये व्यापिन इति स्वसमानकालीनतया विधेयतावच्छेदकावच्छिन्नभानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०द०उ न्नोधर्म्मितावच्छेदकत्वं निवेन्नायतितथाचेति यद्धर्म्मा ति यद्धर्म्मविशिष्टे यद्धर्म्मधर्म्मितावच्छेदकीभूतस्तत्समानकालीनत्वेन विधे
३ यतावच्छेदकावच्छिन्नमवगाहते विधेयतावच्छेदकतापर्य्याप्त्यधिकरणं यद्रूपं यत्समानकालीनत्वधर्म्मितावच्छेदकतापन्नं तद्रूपा
वच्छिन्नावगाहि या बुद्धिरित्यर्थः। विधेयतावच्छेदकतापर्य्याप्त्यधिकरणे समानकालीनत्वधर्म्मितावच्छेदकतापर्य्याप्तिनिवेश
प्रयोजनमाह धूमकालीनेति धूमं धर्म्मितावच्छेदकीकृत्य साध्यतावच्छेदकधूमकालीनत्वेन विधेयमवगाहमानामाम
पि धूमवानयं धूमकालीनवह्निमानित्याकारलिंगकानुमितौ विधेयतावच्छेदकतापर्य्याप्त्यधिकरणं धूमकालीनत्वसहितं वह्नि
त्वं न धूमकालीनत्वधर्म्मितावच्छेदकतया भासते अपि तु शुद्धवह्नित्वमेवेति न तत्र व्यभिचार इत्यर्थः। यद्यपि शुद्धवह्नित्वमपि अनु
मित्यन्तरस्य समूहालंबनरूपधूमविशिष्टपक्षकशुद्धवह्नित्वावच्छिन्नधूमकालीनवह्नित्वावच्छिन्नोभयसाध्यकप्रकृतानु
मितेश्च विधेयतायाः अवच्छेदकत्वपर्य्याप्त्यधिकरणं भवतीति व्यभिचारो दुर्वारः अथ तत्कालीनत्वधर्म्मितावच्छेदकताप
र्य्याप्तविधेयतावच्छेदकताकत्वनिवेशान्नायं व्यभिचारः समूहालंबनानुमितौ धूमकालीनत्वधर्म्मितावच्छेदकतया विधेयतात
रावच्छेदकतया च शुद्धवह्नित्वस्य भानेपि धूमकालीनत्वधर्म्मितावच्छेदकतानाक्रान्तस्यैव तस्य विधेयत्वतदवच्छेदकत्वादिति चेदेवं स ३
ति यद्धर्म्मविशिष्टे तस्यैव यर्थ्यवक्ष्यमाणधूमकालीनवह्न्यवच्छिन्नपक्षकानुमितावुद्देश्यतावच्छेदकमध्य एव धूमकालीनत्वधर्म्मिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वच्छेदकतयावह्नित्वभानाद्विधेयतावच्छेदकतयातस्मिन्भासमानेनतदवच्छिन्नसमानकालीनत्वाभानेनतादृशाविषयत्वस्येतर
धर्मितावच्छेदकतानवच्छिन्नत्वएवतत्रपर्याप्तेर्व्यभिचाराप्रसक्तेः एतद्विधेयत्वसमानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छेद
कावच्छिन्नविषयतयोरेकविषयतानिरूक्तनिवेशात्प्रोक्तसमूहालंबनानुमितौ व्यभिचारः तत्र शुद्धवह्नित्वावच्छिन्नविधेयत्वधूम
कालीनत्वधर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविधेयत्वनिरूपकधर्मिविषयतयोः परस्परपरिहारेण प्रमेयेकसाध्यका
नुमितिसंबद्धयोर्भेदादिति तदपि न साधूमवान्धूमकालीनवह्निमान्पर्वतो वह्निमानिति वक्ष्यमाणानुमितावपि धूमकालीनत्व
धर्मितावच्छेदकतापन्नवह्नित्वावच्छिन्नविषयतानिरूपकस्य शुद्धपर्वतत्वावच्छिन्नधर्मिविषयताया विशेषणद्वयविशिष्टपर्वत
त्वावच्छिन्नाया विधेयतानिरूपकधर्मिविषयताया भेदेन यद्विशिष्ट इत्यस्यवैयर्थ्यापरिहारात् तथापि स्यानिरूपक
ज्ञानानिरूपितविधेयतावच्छेदकताप्रत्ययाधिकरणं यद्रूपं समानकालीनत्वधर्मितावच्छेदकतापन्नतदवच्छिन्नविषयतानि
वेशात्प्रोक्तव्यभिचारो नवा यद्विशिष्ट इत्यस्य वैयर्थ्यं समूहालंबने रूपोक्तयानुमितौ समानकालीनत्वधर्मितावच्छेदकतापन्नं वह्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदाधरी टीका

व्याप्ति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी०
१

श्रीगणेशाय नमः ॥ श्रीकृष्णप्राणवल्लभायै श्रीवृषभानुकुमार्यै नमो नमोस्तु राधादामोदरौ देवावन्मो
मायांगतस्कंदो॥ परस्मरहृषीकारस्तंभावलगतोस्तु मः १ लक्षणमभिधाय युक्तेरनभिधानात्तदुपोद्घा
तस्य न तत्संगतित्वं युक्तमित्यादिलोच्याह पक्षतामिति विप्रतिपत्तिं विशिष्टपरामर्शो हेतुर्नेत्याकारां निरा
सः तन्नाप्रामाण्यज्ञानसंपादनं। लक्षणोपदकतयेति। उपपादकत्वं वानुमितिलक्षणेत्यादि स्फुरं नाभीमां
सकर्मेनेपि विशिष्टज्ञानस्य सत्त्वात्तादृशपरामर्शत्वेन कारणतालाभार्थमाचष्टे। विशिष्टेति। नवचन्नृती
यार्थस्तज्ज्ञानजन्य। जिज्ञासाधीनत्वं तस्य युक्तिनिरूपणेऽन्वयो वाच्यस्तस्य एव तदुपपादकत्वात् तच्चेहनद
र्शयते किंच व्यवस्थापयतीत्यस्य व्यवस्थितिजनकशब्दप्रयोगानुकूलकृतिमानर्थः। व्यवस्थितो हितेत्यार्थ।
विषयतान्वयः कथितस्य विशिष्टपरामर्शत्वावच्छिन्नहेतुत्वस्य युक्तिमंतरेण व्यवस्थापयितुमशक्यत्वात्। राम
त्तत्कथनमेव तद्व्यवस्थापनं। युक्त्यभिधानं च हेतुत्वव्यपदेशः पक्षधर्मस्येत्यादि तु प्रतिज्ञेति तयोरभेदबाधोऽत। १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तथाविधहेतुनासाधकयुक्त्यभिधानफलकप्रतिज्ञापर्यन्तं विवक्षन्ति अनुमितीति। सामानाधिकर।
ण्येनप्रमाणसहकारिणो व्यभिचारानिर्णयकालीनघलाघवज्ञानस्य व्यभिचारशंकापरिभूयावच्छेदका
वच्छेदेनकारणताग्राहकत्वोपयोगः। प्रकृते प्रमाणंकान्वयव्यतिरेकौ तयोः सलाघवयोस्तथाकारण।
ताग्राहकत्वं। कल्प्यताविशेषेविलघुरूपावच्छिन्नस्यैवकल्पयितुंयुक्तत्वादिसग्रेवाच्यं। कल्प्यताविशेषया
सनेनव्यभिचरानिर्णयितत्संशययोः सामंजस्यगुरूपेसनेनानुगतागुरुविशेषाणांतरानुपस्थितिश्चदर्पिता
युक्तान्वयिसाधकत्वंसप्रमर्थः। तुगुणोऽव्ययकृत्वान्नदिच्छाधीनेच्छाविषयत्वंसंसर्गः। प्रतिज्ञाचपक्षधर्मसि
त्वादिसाध्यनिर्देशः अन्तरयवहितोत्तरकालकर्तव्यत्वेनकथनंतद्बोधकासत्वात्। तथाचविशिष्टपरामर्शता
वच्छिन्नकारणतासाधकयुक्त्यभिधानेच्छाधीनेच्छाविषयप्रतिज्ञाकत्वेतिबोधः। ननुयुक्तेः कथंलक्षणोपया।
दकत्वमत आह। तादृशेति। विशिष्टपरामर्शकारणतायाः परमतसिद्धत्वेनानुपपाद्यत्वान्नयुक्तेर्लक्षणोपपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० दकत्वमतः कारणतानिष्ठेत्युक्तं। तथा च परमते तत्संज्ञानद्वयावच्छिन्नत्वमिति तन्निरासद्वारा पदुपपादक
२ त्वमित्यर्थः। एतावता पक्षतानिरूपितसंगतित्वं कथं लक्षणोपपादकत्वस्य पक्षतानिरूपितत्वादित्सतोपद।
भिधानानंतरं पदाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो योर्थः स तत्र तन्निरूपितसंगतिरित्याशयेन
हेदानीमपीति। पक्षतात्वं तन्निरूपणोपायस्यार्थः आकांक्षासंभवेनेत्यनेनान्वयः उपपाद्यनिर्णये उपपादकाकांक्षा
या अनवगाहनादाह। मीमांसकेत्यादि। मीमांसकैः कारणतावच्छेदकांतरे प्रदर्शितेन्यायसमसिद्धकारणताव
च्छेदकमादाय व्यभिचारज्ञानादिविशिष्टपरामर्शत्वनिष्ठावच्छेदकताज्ञानेऽप्रामाण्यज्ञानं कारणतानवच्छेदक
त्वरूपविषयसंशयाधायकमिति भावः। तथा च दर्शितसंशये सति एकतरकोटिनिर्णयेच्छा परार्थकारण
तायां परामर्शत्वावच्छिन्नत्वनिर्णयेच्छारूपा तदुपायेच्छा भासत्तदुपपादककथनमाकांक्षेति विशिष्टपरा राम
मर्शत्वस्यानुमितिजनकतावच्छेदकत्वोपपादकं किमिति जिज्ञासेत्यर्थः। तृतीयार्थः संगतिलक्षणघटकतया २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयोजकत्वं संगतित्वान्वयी। इयमपि परामर्शकारणतायां परामर्शत्वावच्छिन्नत्वोपपादकं किंचित्स्याति
ज्ञानाधीना। न च पक्षतानिरूपणेन पक्षताज्ञानेपि तस्य निरुक्तोपपादकताज्ञानाप्रयोजकत्वमिति वाच्यं
स्वसमानाधिकरणपरामर्शनिष्ठकारणतानिष्ठधर्मघटितसंबंधनिर्वाहकत्वात्। वस्तुतस्तु मीमांसकविप्र
तिपत्तिवारकत्वेन कारणतायां परामर्शत्वावच्छिन्नत्वानिर्णयादनुमितिरेव दुर्निरूपेति तत्कारणत्वेन निरू
प्यसंपक्षताया अयुक्तमिति परामर्शत्वावच्छिन्नत्वोपपादकत्वस्य प्रकृतपक्षतोपपादकत्वरूपत्वं बोध्यं मूले
पक्षताया उपलक्षणत्वे धूमो वह्निव्याप्य इति ज्ञानसाधारणहेतुताव्यवस्थापनभ्रमः स्यादतो याचष्टे मूले इति।
आप्त्योपमितिसमूलानुरोधादाह। व्याप्येति संप्राप्यते इति। अन्यथा व्याप्यवानित्यत्रानास्यर्यबोध्यं। विशेष्यताया
ति। विषयताविशेषः। पक्षे विपक्षविषयतावच्छिन्नहेतुविषयतावच्छेदेन सर्वः। धूमो वह्निव्याप्यः धूमवांश्च
पर्वत इति समूहालंबनवारणाय पक्षे नेत्यवच्छेदेनेति वन्हेः प्रसक्ति। न च विशिष्टपरामर्शत्वावच्छेद्यानुमितिहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰टी॰ स्वरूपसाध्यमसिद्धिः लाघवमार्गेणावच्छेदकत्वं तन्मानोपगमात्। यो यद्धर्मावच्छिन्नान्वयव्यतिरेकानुविधा
३ य्यन्वयव्यतिरेकितावच्छेदकयत्कार्यतावच्छेदकः स तत्कार्यतावच्छेदकावच्छिन्नप्रतियोगिकतद्धर्माव।
च्छिन्नकारणताश्रय इति सामान्यमार्गे तेषु हेतुपरामर्शान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकप्रति
योग्यानुमितिकत्वरूपः। अग्रे परामर्शहेतुत्वेनेत्यग्रिममूले नन्वप्रथमोपस्थितत्वं विशिष्टपरामर्शोत्पत्ति
क्षणवृत्तिध्वंसप्रतियोगिक्षणवृत्त्युपस्थितिविषयत्वं तच्च ज्ञानद्वयसंभवतीत्याशंक्य ज्ञानस्वप्रकाशत्व
मालंब्योपपादयति ज्ञानद्वयपक्षेति ज्ञानस्वप्रकाशपक्षसाधारणतया कल्पनालाघवमात्रे श्रुसामेवेस
नेन निर्भरो वक्ष्यते। अनुपयुक्तमिति। अन्यथासिद्धत्वापातादित्यर्थः तावदनुमितेः पूर्वमिति। अथ व्याप्यता
वच्छेदकप्रकारकव्याप्तिज्ञानेऽनुमितिनियतपूर्ववर्त्तित्वसंभवाद्विसिद्धत्वेपि पक्षधर्मताज्ञानस्य तथा राम
त्वे नोभयवादिसिद्धं नैयायिकैस्तस्य नियतपूर्ववर्त्तितानंगीकारात् परामर्शक्षणे तन्नाशादिति कल्प ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नालाघववशावश्यकत्वं।यत्तु सर्वत्रपक्षधर्मताज्ञानमपेक्षा तदुद्भास्यकमिसभिनामानेनेदमिति तन्न।ग्रं
यकृन्मते द्वितीयक्षणे विशेषगुणस्यानुत्पादात्तत्र विशेषगुणोत्पादोपगमे पितथापीत्यादिग्रंथे औत्सर्गि
कत्वपेत्तिपदासंगत्यापत्तेश्च वाश्रुतेण तादृशपक्षधर्मताज्ञानस्य सार्वत्रिकत्वासिद्धेः।अन्ये केचित्तु पक्ष
धर्मताज्ञानकालीनत्वोपलक्षितत्समानाधिकरणव्याप्यतावच्छेदकप्रकारकव्याप्तिप्रकारकनिश्चयत्वेनहेतु
ताज्ञानकालीनत्वोपलक्षित) हृयकारणतावादिमीमांसकसंमतात्तादृशसमानकालीनत्वसोपलक्ष
णतयाकारणतावच्छेदकत्वात्तादृशकारणस्यानुमितिनियतपूर्ववर्तित्वं नैयायिकसिद्धमेवेति नच पत्र
पक्षधर्मताज्ञानमेव पक्षे बाधनिश्चयात्मकं सत् तन्न व्याप्यवच्छिन्नाभावनिश्चयरूपमुद्बोधकं नतो व्याप्तिस्म
रणं तत्र तृतीयक्षणे साध्यवच्छिन्नाभावनिश्चयसत्वेन परामर्शानुत्पादे पितनोनुमित्यापत्तिस्तत्पूर्वक्षणे बा
धनिश्चयनाशादिति वाच्यं दृष्टत्वादिति तन्न पक्षधर्मताज्ञाननाशे कुचिदपि फलोत्सत्तेर्मीमांसकमते सिद्धत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०दी० भावानुपपद्यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मावच्छेदेन पक्षधर्मताज्ञानं हेतुरिति दीधिसभिधानेनासंगता
४ पत्त्यानस्यापि कारणांतर्गतत्वात्तस्य पूर्वसत्त्वापेक्षणात् न च तस्यापि विनिगमनाविरहलभ्यकारणतामभि
प्रेत्यैव तदभिधानमिति वाच्यं तादृशाभिमानस्य लीपपक्षधर्मताज्ञानस्य नैयायिकाप्रसिद्धानुमितिपूर्ववृत्तिताभा
वस्यैव विनिगमकत्वात् उक्तापत्ताविष्टापत्तौ व्यभिचारस्य स्फुटत्वाच्च व्यापक्षधर्मताज्ञानस्य कारणतावच्छेदकत्वे
पि कारणतावच्छेदकस्यापि प्राक्सत्त्वापाअपेक्षणाद्वा केचित्तु व्याप्तिज्ञानस्य कारणतावच्छेदकसंबंधः स्वम
व्यापकत्व पक्षधर्मताज्ञानस्य तु व्यापार एव तथा च व्यापारसंबंधेन तस्य नियतपूर्ववर्तित्वात्सुमपवादि सिद्धमेव
अत एव तत्कारणमित्यभिमानेनैवापंग्रंथः न च विना व्यसदवस्य पक्षधर्मताज्ञानरूपोद्बोधकादुत्पन्नव्याप्ति
स्मरणादनुमित्यापत्तिरिति वाच्यं पक्षधर्मताज्ञानद्वितीयपक्षणे व्याप्तिस्मरणं तद्द्वितीयक्षणे परामर्शःत राम
द्वितीयक्षणेऽनुमितिरित्येवोत्सर्गिकीरीतिरित्यभिमानादिति तदसत् तादृशव्याप्तिस्मरणद्वितीयक्षणे ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वमीमांसकैरनुमितिस्वीकारात्तन्मते समवायेन पक्षधर्मताज्ञानस्य कारणत्वस्वीकारे बाधकाभावात् । परं
परासंबंधेन हेतुत्वकल्पनाया अन्यथत्वात् ः अन्ये तु मीमांसकानामयमभिमानः । विशिष्टपरामर्शकारण
त्वेनाभिमतं पक्षधर्मताज्ञानं व्याप्तिस्मरणं चानुमितिहेतुः अनुमितिरपि विशिष्टपरामर्शसमसधिकरणत्वेना ।
भिमतलक्षणेन स्वीक्रियते । एवं च विशिष्टपरामर्शानुमित्यानुपपत्तातान्नियतपूर्ववर्त्तित्वसिद्धेन तु समसधिकरण
क्षणे सत्त्विकस्यापि नियतपूर्ववर्त्तित्वं सिध्यतीति ममानुमितिपूर्ववर्त्तित्वं न चानुमतमिति भिन्नत्वेन तद्वत्तावापत्तिपूरणीयमि
सेनेन सहयनेन द्वित्रिणाराधर्यविचासादिज्ञानमिति । न च यथा व्याप्तिज्ञानस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधया
स्यावश्यकत्वं पक्षधर्मताज्ञानस्यानुकूलं तदितिवाच्यं । तस्यापि पक्षतावच्छेदकज्ञानविधया आवश्यकत्वात् । ननु
पर्वत इति ज्ञानस्यावश्यकत्वेपि धूमवान् पर्वत इत्येतावत्पर्यन्तमनावश्यकमित्याशंकते यद्यपीति लौकिकत्वस ।
क्षेसंबंधितावच्छेदकप्रकारकज्ञानं हेतुः तथा च पर्वतादौ धूमसंयोगलौकिकत्वसक्षेसंबंधितावच्छेदकप्रका ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० रकज्ञानविषयाद्धूमवान्पर्वत इति ज्ञानस्याव्यवच्छेदकत्वमिति साक्षात् तत्र तद्विषयीभूतधूमः पर्वते भवति इत्याकारकज्ञाने से

५ वावगाहकत्वाद्धूमवान्पर्वत इति ज्ञानस्यानावश्यकत्वात् अत्र केचित् वह्निव्याप्यधूमवान्पर्वत इति ज्ञानव

त्पर्वतत्वावच्छिन्नधूमो वह्निव्याप्य इति ज्ञानस्यापि हेतुत्वं पर्वतवृत्तित्वविशिष्टव्याप्तिवैशिष्ट्यावगाहित्वे सति व्या

प्तिविशिष्टवैशिष्ट्यावगाहि विषयिताशालिज्ञानत्वेन हेतुता एकविशेषणविशिष्टपरवैशिष्ट्य विशिष्टविशि

ष्टवैशिष्ट्यविषयतायाः एव विवेकः न च पर्वतवृत्तिधूमो वह्निव्याप्य इति ज्ञाने विशिष्टस्य वैशिष्ट्यविषयतासंभ

व इति वाच्यं तुल्यवित्तिवेद्यतया धूमेपि आधेयतासंबंधेन पर्वतज्ञानकाले आधारतासंबंधेन पर्वतेपि धूमज्ञा

नात् अत्रापि नानाहृदयाविषयत्वमप्याहतमेवेति प्राहुः तच्च पक्षधर्मतावच्छेदकस्यानुयोगितावच्छेदकप्रकारकज्ञाना

विषयोपयोगान् एकविशेषणाविशिष्टपरवैशिष्ट्यबुद्धावनुयोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वमत एव ते रा०म०

नपक्षतावच्छेदकप्रकारकज्ञानविधयोपयोगित्वाभिमाने पर्वत इति ज्ञानस्यावश्यकत्वमापाततः न सहेतुत्वात् धू ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मवान्पर्वतइतिज्ञानस्येत्यपास्तं।लाघवंचव्यासंगे पक्षधर्मत्वांशेच निश्चयत्वाप्रवेशेनसंशये द्वि।
विधविशिष्टवैशिष्ट्याविषयतायाअभावादित्याहुः।इदंतुविशेष्यविशेषणमितिरीत्यापरामर्शद्वितु
मित्सानशोभनंनेमीमांसकविचारग्रंथेदंपर्यमोहएतदिति।अग्रेप्रत्यक्षसामग्र्याइत्याद्यग्निमग्रंथे
नेतिधूमवान्पर्वतइतिज्ञानस्येवसर्वत्रोद्बोधकत्वमित्यभिमानस्यतेननिराकरणात्।नद्वयपादितावेद्वि
शिष्टपरामर्शसिद्धत्वदातत्सकारणत्वमनयवादमिति।किंमीमांसकशंकातात्पर्यमित्यत आह।तावता
चेति।अतएवमीमांसकानांसम्मनाघवाभिमानादेव।व्याख्यास्यते।नचतदानीं।व्याप्यत्वावच्छेदेनव्याप्तिर्गृ
हीतेइत्यादिना।पर्वतेधूमदर्शनस्यासार्वत्रिकत्वेपिनक्षतिरितिमतमाहकेचित्विति।अत्रेतिनचहेतुता
वच्छेदकसमानाधिकरणेनव्याप्यवगाहियत्परामर्शस्यव्यभिचारज्ञानाप्रतिबध्यतयाप्यायमतेकारणत्व
भावइतिवाच्यंशाब्दपरामर्शस्येवापितन्मतेहेतुत्वात्।एतन्मतमश्लीलदोषस्येति।उक्तस्थलेवस्तुतोव्याप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० तावच्छेदकावगाहनेप्यवच्छेदकत्वेनन तदवगाहनमिहतु वस्तुतोपि न तदवगाहनमिति भेदाः स।
६ म्यगिति। अन्यथानुमितिहेतुत्वेनैसेवव्यक्तमनुनयानुपपत्तज्ञानमेवेति॰ पक्षतावच्छेदकावच्छिन्नविशेष्य
ताख्यांप्रकारतात्मकत्वस्य प्रकृतपक्षविशेष्यतानिरूपिताभेदसंबंधावच्छिन्नप्रकारतात्वस्यवानिवेशात्।
पर्वतोवह्निव्याप्यधूमवानितिज्ञानव्युदासः पक्षांशेसंशयरूपहेतुत्वांशेनिर्णयरूपतयाकारणमेवेतिभावः। य
क्षेति। अतएवगगनमहत्तातिनिश्चयदशायांसाध्यव्याप्यहेतुमज्ज्ञानवदितिज्ञानासंभवेपिगगनपक्षका
नुमितिर्निराबाधैवेतिद्रष्टव्यं। अत्रसाध्यव्याप्यावच्छिन्नहेतुप्रकारकपक्षमुख्यविशेष्यकज्ञानस्यैवानुमि
तिहेतुत्वात्तादृशमूलार्थवर्णनमसंगतमितिस्वरसः। गतमिति। तत्प्रकारकतद्विशेष्यकसंस्कारस्येवत
त्प्रकारकतद्विशेष्यकोपनीतभानोपधायकत्वानुरोधेनैवज्ञानेतद्विशेष्यकत्वनिवेशात्। तन्नियमपरित्या राम
गेवतत्रतद्विशेष्यकत्वस्यापिवैयर्थ्येनपरित्यागात्। तथाचमहानसीयोधूमभानादपिकर्मतांदोषमभा ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नासंभवेनविनाऽभिमानंपर्वतोधूमवा।नितिज्ञाननियमा।न्निर्वाहा।दितिभावः।स्वरूपसंबंधादीता।दिताः।स्वं
डपरिग्रहः।कल्पनं।अयंपक्षस्यो।विशिष्टपरामर्शवान्नुस्येसन्निर्णोसन्त्रिकध्वंसप्रतियोगित्वसंबंधेनानुमितिमत्त्वा
दित्यनुमानं।नुवेतिज्ञानद्वयादेवैसेवकारार्थस्फुटीकरणं।सामान्यरूपेणकिंचिद्धर्मावच्छेदेनव्याप्तिज्ञानवत्तादि
नगविशेषरूपेणोतिविभिन्नव्याप्यवच्छेदकप्रकारकज्ञानद्वयसाधारणसामग्रीत्वस्यदुर्वचत्वात्।रंडवक्ता।दिवत्स
हकारितालाभापत्तेरितिपंचेतिविवरणोक्ति।अनुमिताविति।अग्निमद्धेतुपादानुषंगभयात्तस्यकारणतावच्छेद
कताकल्पस्तुपेतिविघ्नतेइतियद्धर्मावच्छेदेनेति।एतेनधूमत्वसामानाधिकरण्येनव्यभिचारज्ञानदशायांनानु
मित्यापत्तिः।अभिहितमिति।तद्धर्मावच्छेदेनपक्षधर्मताज्ञानोक्तावतिप्रसक्तस्यावच्छेदकत्वानुपगमोधू
मवान्पर्वतइत्यन्यथाख्यात्यापत्तिरवच्छेदकत्वविवक्षायांवैयर्थ्यंचेतिदीधितौतेनैवरूपेणेत्यभिहितं।अ
नेदलोचनीयं।एवमपिधूमोवह्निव्याप्योधूमवद्भूमिरितिज्ञानाद्धूदेवह्न्यनुमित्यापत्तिः।मीमांसकमतेसमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० नप्रकारकत्वेनकार्यकारणभावात्समानविशेष्यताप्रत्यासत्त्यानादृशकार्यकारणभाववशात्तादृशापत्तिकार
७ णासंभवादिति अत्राहुः पक्षधर्मताज्ञानानुमित्योः समानविशेष्यताप्रत्यासत्त्यैवकार्यकारणभावइत्यभिप्रायेणायं
ग्रंथः।अतएवभट्टाचार्यैर्व्याप्यतयापक्षधर्मतयाचेतिग्रंथेसमानविशेष्यकत्वंपश्चाद्व्यक्तीकरिष्यतेइतिमीमां
सकमतेतयोःसमानविशेष्यताप्रत्यासत्त्याकार्यकारणभावोनक्लृप्तःकिंतुव्याप्यव्यापकभावइतिनदोषइत्यस्मेस
र्वत्रेतिसार्वत्रिकत्वंप्रयोजकतापांकार्यतावच्छेदकत्वंतुतद्भावेइतिसर्वत्रेतिकार्येसत्रिव्यापकत्वहेतुलंभकं।कुतइतित
दसत्त्वलाभायेतिवावोध्यम।तथात्वंफलोपधायकतावच्छेदकत्वं।कल्पनालाघवंस्फुटीकर्तुंव्याचष्टेधर्मपरमि
ति।मीमांसकानांव्याप्यतावच्छेदकप्रकारकत्वेहिहेतुतावच्छेदकतायाःसंबंधानेनैयायिकमतेइतिकल्पना
लाघवमाहतस्येति।उपजीव्यत्वंचेत्कारणत्वंतदाहव्याप्यत्वेनेतिअनुमितिपूर्वंविशिष्येत्सप्तमीमीमांसकमतेनैया राम
यिकमतेतुकेवलव्याप्तिज्ञानसत्त्वाऽनुमितिसत्त्वानैयायिकेत्याशयेनाहएतावतेति।उक्तकालमिति।अयंप ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुखे गौरवप्रभेदस्यएव लाघवांतरविरह विशिष्टगौरवं वाविरोधीतिभावः॥तदुक्तं ज्ञप्तिहेतुताग्रहका।
लेहेतुत्वज्ञप्तित्वेनागृहीतेसर्थः॥तथा च मूलेऽनुमितिपूर्वं तद्धेतुताग्रहदशायाम सिद्धोपक्षधर्मताविषयकत्वा।
सिद्धोपश्चात्पक्षधर्मताविषयकत्वसोत्वस्थितावयियुगपदुपस्थितिसभावान्नएककारणतानवच्छेदक।
त्वाद्व्याप्यत्वज्ञानत्वपक्षधर्मताविषयकत्वयोर्युगपदुपस्थितेरेककारणतावच्छेदकत्वसाधिकापाआ।
भावाद्दितिवार्थः॥वस्तुतस्तु अनुमितेः पूर्ववर्त्तितयाऽसिद्धोयुगपदुपस्थितिसभावान्नु अन्वयव्यतिरेकग्रहविषय
त्वाभावाद्व अन्वयव्यतिरेकग्रहविषयसेवलघुरूपावच्छिन्नद्वयस्यसत्त्वेलाघवाद्धेतुताग्रह इतिभावः॥का
र्यकारणभावेगृहीतेहियमानंगौरवं न दुष्यति अत्रतु तथाकार्यकारणभावग्रहएवनास्तीत्याशयः॥विशिष्टपराम
र्शसिद्धोतास्पूर्वं॥अतिप्रसक्तेस्वरूपसंबंधरूपावच्छेदकत्वासंभवः॥तस्मानतिरिक्तवृत्तित्वेनेयस्तनिबंधनत्व।
तिलाघवात्तदेवाह अनतिरिक्तवृत्तित्वेति॥अन्ययेसमज्ञानद्वयंविना नेत्यर्थमभिप्रेत्याह ज्ञानद्वयकत्वक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी०
८

तयेति। व्याप्तिप्रकारकपक्षधर्मताज्ञानस्य ज्ञानद्वयकल्पकत्वेनासिद्धावुभयवाद्यसिद्धत्वादिति तस्येसादिमूला
र्थमभिप्रेत्याह तथाचेति। स्मृतेः सन्निकर्षसहकारित्वानुसारेणायमुल्लेखयपेति। आत्मभावस्याविस्मृतेर्लोपरामर्शस
न निश्चयत्वमित्याशंकावारणाय धूमत्वासाधारणेति। मीमांसकमित्रिसामग्र्यंशस्यैव विशिष्टपरामर्शत्वमित्या
नं निराकुर्वन् असिद्धिपरिहारमाशंक्ते येति। पक्षतावच्छेदकनिर्विकल्पकमुद्रासाया विशिष्टविशेष्यकज्ञानेपि
प्रायस्याभावादिति परामर्शस्य व्याप्तिज्ञानोत्तरत्वात् पक्षधर्मताज्ञानत्वाद्वेत्याशयः। अवच्छेदकत्वावगाहीति हे
तुगर्भ। गाद्याधर्यं अमत्रापि मीमांसकसिद्धज्ञानद्वयोत्तरं तथा विशिष्टपरामर्शं भवतु मानेन त्याप्यवच्छेदक
तासंस्कारस्य फलेपधायकसामग्रीघटकतानुरोधाय। एवंविधमानेसत्यापि व्याप्यत्वेनेति। पक्षीयधूमो वह्निव्याप्यो
धूमत्वादित्यर्थः। तत्रापि हेतोरसन्निकर्षादिति यावच्च प्रत्यक्षविशिष्टज्ञानसामग्रीविरहादिति फलासंगतिः। राम
अनवकाशादिति। उपनायकज्ञानस्य मनोभिन्नप्रमाणासहकारित्वेन चक्षुरादिरूपतत्सामग्रीकालीनत्वे ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचापादकासिद्धेः।मानसान्यतेंद्रियासन्निकृष्टइतिसूत्रेसन्निकर्षोलौकिकोऽभिमतस्तत्वमानसमात्रं
कैतेअयेतिसूत्रेमनसावहिर्विषयकपरामर्शजननेकथंनाशुरासापा।वहिर्विषयकसंशयनिश्चयपयोर्जननं
दृष्टांतयति।यथेति।वहिरसांते उक्तंवहिरिंद्रियासहकारेणवहिर्विषयकलौकिकप्रत्यक्षजनकत्वस्याभा
वःसहकारित्वसंभेदगर्भतयाघ्राणादेर्विवक्षाद्दृशजनकत्वप्रसिद्धिःघ्राणादेरपिमनःसहकारेणजनक।
त्वस्यप्रसिद्धिरतःवहिरिंद्रियविशेषणंमनसोपिवहिरिंद्रियासहकारेणसुखादिप्रत्यक्षजनकत्वाद्द्वि
तीयंवहिःपदंसिद्धामनःसंयोगानिद्रेतिमथुरा।अनुभवोनिश्चयरूपःइहापिइंद्रियासन्निकृष्टानींद्रिया।
लिंगस्थलेपिज्ञानांतरहेतुमानुपक्षइतिज्ञानंविशेष्यहेतौ।लौकिकेतिमानसाविषयत्वात्प्रसिद्धिवारणा
य।लौकिकज्ञानाविषयत्वंनव्याद्रेरतोमानसेति।सुखादिमानसेचनवहिरर्थानांनतेर्ज्ञानप्रत्यासत्त्यनुप
गमात्अतोनतत्रव्यभिचारः।मथुरानाथमहाचार्यात्मकपदसाधारणंसहकार्यसाधमनोवहिर्गोचरंयद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० हार्थविशेष्यकप्रत्यक्षकारिकांप्रमांप्रत्यक्षप्रमितिंजनयतितत्सर्वंतद्विशेष्यकतत्प्रकारकप्रमायाःकरणंभ
९ वतीत्यर्थः।नचायमहार्थविशेष्यकयदर्थप्रकारकप्रत्यक्षप्रमितित्वतदनुभवत्वव्याप्यतात्यवच्छिन्नकार्यता
निरूपितताहात्म्यसंबंधावच्छिन्नकारणताश्रयत्वेसतिस्वभिन्नमनोभिन्नप्रमाणजन्यत्वेप्रत्यक्षव्या
प्यतात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वकत्वतितदर्थविशेष्यकतदर्थप्रकारकप्रमायाःकर
णंभवतीतिव्याप्तिःशरीरमत्राभिमतंजन्यज्ञानत्वावच्छिन्नजनकशरीरात्मादेःकार्यत्वावच्छिन्नजनक
कालादेर्विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नजनकविशेषणतावच्छेदकप्रकारज्ञानादेश्चवारणायसत्यंतं
तत्रापिविशेषणतावच्छेदकप्रकारकज्ञानादेस्तत्कर्मकृतित्वेनजन्यताकत्वमादायातिप्रसंगेनोज्ञात्वियरं
तत्वावच्छिन्नत्वंनतूत्पर्याप्त्यावच्छेदकतात्वंपक्षीभूतयाप्तिस्मरणादेस्तत्प्रकारकप्रत्यक्षत्वावच्छिन्नजन राम
कत्वेनमायनयेस्वरूपासिद्धेः।किंतुतन्निष्ठावच्छेदकताकत्वंसुखादिसन्निकर्षस्यमनोमप्रमाणांनरासहक। ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रित्वाद्व्यभिचारो नेतावहिष्टसमर्थविशेषणांपरामर्शादेः अभावज्ञानत्वावच्छिन्नस्वरूपकारणताश्रयया
व्याप्तिज्ञानादिसहकारितयाव्यभिचारो नो ज्ञानत्वादिकमपहाय प्रत्यक्षप्रमितित्वनिवेशः लौकिकप्रत्यक्षंप्रतिविष
यत्वेनजनकेसंख्यादौ व्यभिचारः तस्मात्तादात्म्यसंबंधानवच्छिन्नत्वनिवेशः नचनिर्विकल्पद्वाराविशेष्यप्रत्यक्षज
नकेनत्वप्रमाकरणत्वमिष्टमेवेतिवाच्यं तथापि निर्विकल्पकाजनकविषयेव्यभिचारस्यदुर्वारत्वात् विपरीतज्ञा
नोत्तरप्रत्यक्षेविशेषदर्शनादेर्नकारणत्वं अपितुविपरीतज्ञाननिवर्तकतयाकथंचिदुपयोगित्वमितिनतत्र
व्यभिचारइतिवदंति। तन्नपरामर्शादेर्व्याप्तिज्ञानसहकारित्वेपिनक्षतिः व्याप्तिज्ञानस्यपर्याप्तिघटितवक्ष्यमाण
प्रमाणत्वाभावात् ततः प्रत्यक्षप्रमितिपर्यंतानुधावनंव्यर्थमित्याशयेनाह अनुभवार्थकमितिविषयहेतुतापाअ
प्रामाणिकत्वात्तादात्म्यसंबंधानवच्छिन्नत्वंव्यर्थमित्याशयेनासाधारण्यंनिर्वक्तुमारभंते। अत्रेति। जन्यगुणता
वच्छिन्नंप्रतिद्रव्यत्वेनहेतुत्वाद्दोषवारणायस्वरूपावृत्तित्वेनेति। तादृशमेतिवहिरिंगोचरानुभवेसर्यः संयोगत्वाद्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी०
१०

वच्छिन्नेदृश्यत्वेन हेतोः शरीरादेर्वारणायानुभववृत्तित्वप्रवेशः तर्क्कालंकारमतदूरं आत्मस्मरणं यद्यनुभववृत्ता
व्यापकज्ञानवृत्तिजात्यवच्छिन्नकार्यतानिरूपितविषयताघनवच्छिन्नकारणताश्रयत्वे स्वावृत्तिधर्मावच्छिन्न
प्रमाकरणतानिरूपितकार्यतावच्छेदकीभूतामानसज्ञानावृत्तिजात्यवच्छिन्नकार्यताप्रतियोगिककारणताश्र
यत्वे च सतीत्यादरायादृशवहिर्गोचरप्रमोत्पादकं स्यात्तादृशधर्मामानसान्यतादृशज्ञानादृशप्रमायाः फलोपहितकरणं।
स्यादित्यादिशरीरं अत्र संयोगत्वावच्छिन्नं प्रतिद्रव्यत्वेन हेतोः शरीरादेर्वारणाय ज्ञानवृत्तीति वदेत्तित्तत्रभट्टा
चार्यमते विषयहेतुतया अप्रामाणिकत्वाद्विषयताघनवच्छिन्नत्वं यौ अनुभवताव्यापकत्वं अनुभवनिष्ठभेद।
प्रतियोगितावच्छेदकत्वमनुभवत्वव्याप्यत्वमेवेति तन्न नकश्चिद्विशेषः। किंच यद्यसाधारणं सहकार्यसाध्य
मनो वहिर्गोचरप्रमाजनकयतीति मूलत्वमनेनेतिहि वहिर्गोचरप्रमाजनकत्वं भवतु इस्सत्वं नच गदाधरे एम
णापितसर्कमेव किंत्वसाधारणसहकारित्वमात्रमुपात्तं अतएव प्राक्मनसेत्यादिनामनःप्रतियोगिक १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मसाधारणसहकारित्वसाधारणासहकारित्वमर्थद्वयमभिधायबहिर्गोचरभ्रमोत्पादकत्वमेवफलितार्थो

भिहितः तथाचास्माकं तत्परित्यागेनापराधइतिवाच्यं तथापिबहिर्गोचरभ्रमोत्पादकत्वस्यपृथक्निवेशनं

मर्थज्ञानवृत्तित्वस्थानेबहिर्गोचरभ्रमोत्पादकत्वनिवेशेनेवसंस्कारादिवारणात्ज्ञानवृत्तित्वंनिवेश्यपृथ

क्तन्निवेशेऽभिप्रायोगौरवात्।नचासाधारणपदार्थान्तःसहकारिपदार्थोऽप्यएवेतिवाच्यं।लाघवेनसाधारणस

हकारिपदार्थनिवेशसंभवेवैविसात्एतदभिप्रायेणैवबहिर्गोचरभ्रमजननेपरसाधारणंसहकारिभवतीत्या।

द्यभिहितंप्राक्।तादृशज्ञानवृत्त्यनुभवत्वव्याप्यत्वनिवेशंसंयोगत्वादेर्वारणात्समात्तंअर्थमिसतआहतादृ

शधर्मत्वस्येति।जातिपदंचसमवायेनानुभवत्वव्याप्यत्वनिवेशलाभार्थंतेनानुभवत्वस्यकालिकविषयित्वादि

नानुभवत्वव्याप्यत्वेपिनक्षतिः।अनुभवत्वस्यानुभवत्वाव्याप्यत्वादसिद्धिमाशंक्यपरिहरति।व्याप्तीतिनतत्रेति

नचापादकासिद्धिरेवंत्रोनप्रतिकूलातदाहार्यनिर्वाहकत्वादितिवाच्यंतथासहत्वाद्याभानेनापादकाभावसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा॰टी॰ धेनेसिद्धसाधनप्रसंगात्। एतद्दोषेति। उभयचक्षुर्जन्यतायाएकातादृतिभाव॰ जनकतायेति। जन्यतायांस्वानि
११ रूपितत्वदानेपितद्भिन्नवृत्तिचक्षुरनिरूपितापितज्जन्यतास्तिनिरूपकभेदेनजन्यताभेदादित्याशय॰ तज्जन्येतिअ
त्राणुक्तेदोषवारणायस्वानिरूपितत्वंदेयं। तज्जन्येति। स्वानिरूपितमानोभिन्नप्रमाणजन्यत्वानिरूपकत्वनिवे
शे। आलोकाद्यवारणात्। तादृशजन्यतावच्छिन्नजन्यतानिरूपकत्वार्थकेंजनकपदांफलेनिष्फलानुपाधायका
लोकवारणायविशेष्यदलेपिफलोपधानंविवक्ष्यं। आदिनाइंद्रियत्वानवच्छिन्नत्वसत्तासवावच्छिन्नत्वसावा
निवेश॰ इंद्रियत्वंचात्मभिन्नत्वेसतिज्ञानकारणमन॰संयोगाश्रयत्वंनतिः पृथिवीत्यादिनासांकार्यात्। तज्जन्म
तावच्छेदकेति। एतेनस्वभिन्नमनोभिन्नप्रमाणजन्यवृत्तिप्रसक्षत्वआप्यजातवच्छिन्नकार्यतानिरूपकत्वरूप।
मथुरापरिष्कारेकार्यतावच्छिन्नंप्रतिकालत्वेनजन्यसत्त्वावच्छिन्नंप्रतिद्रव्यत्वेनचकारणत्वात्तथापिघटत्वगादि एम
जन्यचाक्षुषादौचक्षुरादेर्जनकतयादृष्टांतासिद्धिवारणमद्रुमाहवृत्तित्वंजन्यताविशेषणंतेनैवदर्शितंतद्वा ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देयं चाक्षुषत्वस्य तज्जन्यतानवच्छेदकत्वात्। द्वितीयकार्यकारणभावस्य प्रामाणिकत्वे प्रत्यक्षत्वव्याप्य
त्वेनैव तद्दोषनिरासात्। विशेषणज्ञानेति। विशिष्टानुभवत्वं तत्कार्यतावच्छेदकं तज्जन्यप्रामाण्यजन्यतावच्छे
दकं प्रत्यक्षत्वं न प्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेदकमिति नापादकासिद्धिरित्यर्थः। ननु बहिरिन्द्रियस्य
लेपृथक्कारणताकल्पने गौरवमनुमित्यादौ विशेषणज्ञानस्यानपेक्षणादित्यतोऽलौकिकप्रत्यक्षत्वस्यैवोप
नायकज्ञानजन्यतावच्छेदकत्वमङ्गीकृत्य समाधत्ते। अथवेति। निरुक्तं प्रत्यक्षनिष्ठभेदप्रतियोगितावच्छेदक
त्वं। अन्धकारे व्यभिचारवारणाय भावेति। एतच्च द्रव्यविषयकं गुणादिप्रत्यक्षमङ्गीकृत्य तदनुपगमे त्वाह द्रव्ये
ति। तथा च द्रव्यभानार्थ आकः गुणादिभावे नियतोऽपि अन्यथासिद्ध इति भावः। आदिना विशिष्य तत्तद्रूपचा।
क्षुषत्वपरिग्रहः। अत्र मथुरानाथेन निर्विकल्पकादिकं जनयित्वैव साक्षात्तद्विशेष्यकत्वप्रकारकचाक्षुषादिज
नके चक्षुःसंयोगादौ व्यभिचारवारणाय स्वभिन्नमनोभिन्नप्रमाणजन्यमहत्त्वीसादिविशेष्यत्वं तत्र चक्षुरादेः स्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० त्मकप्रमाणजन्यचाक्षुषत्वावच्छिन्नजनकत्वान्मनोन्यप्रमाणजन्यवृत्तित्वावच्छिन्नत्वाद्दृष्टांतासिद्धिरतः
१२ स्वभिन्नत्वमनोभिन्नत्वयोर्निवेशः। मनोभिन्नत्वं च मनस्त्वघटितधर्मानवच्छिन्नत्वाद्वजनकत्वं अतश्चाक्षुषा
दिकं प्रति चक्षुर्मनोयोगादेः कारणत्वेनक्षुरादौ नासिद्धिः। न वा विभिन्नप्रमाणात्मत्वगादेरयोंद्रियत्वेन कारणा
ताभेते तज्जन्यचाक्षुषादिकमादायसापतः इंद्रियत्वं न जातिः किं तु ज्ञानकारणमनस्संयोगाश्रयत्वं। न चैवं ज्ञान
सामान्यं प्रति त्वचोऽहेतुत्वेन मे दृष्टांतासिद्धिः। प्रमाणवृत्तिजन्यतायास्त्वगवृत्तित्वेन विशेषणीयत्वात्। न च प्र
माणत्वं यदि प्रमाकरणत्वमात्रं तदा तस्य स्वभिन्नमनोभिन्नालोकादिसाधारणतया तद्दोषो दुर्वार इति अनु
भवत्वव्याप्यजात्यवच्छिन्नलौकिकविषयत्वानवच्छिन्नकार्यताःप्रतियोगिककारणताश्रयत्वं तद्वाच्यं चक्षु
रादेस्समाप्त्मनश्चाक्षुषत्वावच्छिन्नं प्रत्येव जनकत्वात्तादृशप्रमाणत्वमक्षतं। द्रव्यांधकारसमूहालंबने व्यभि राम
चारवारणाय द्रव्यवृत्तित्वविशिष्टलौकिकविषयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रत्यालोकत्वेन कारणताया १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वच्यतयात्तत्कार्यतावारणाय लौकिकविषयतासंबंधावच्छिन्नत्वनिवेशः। नचैकस्याश्चक्षुरादिव्यक्तेस्तादृ
शकारणताश्रयत्वं तज्जन्यज्ञप्तिकार्यताप्रतियोगिककारणताश्रयतयाऽसिद्धिरिति वाच्यं स्वभिन्नत्वं
प्रमाणविशेषणमप्रहाय कारणतायां स्ववृत्तित्वोपादानादित्यभिहितं तेन चक्षुरादेरिवालोकस्यापि
मुद्दचाक्षुषत्वमेव कार्यतावच्छेदकं मितिजातिपर्याप्तावच्छेदकताकत्वमपेक्ष्य लौकिकविषयत्वानवच्छि
न्नमुक्तं तत्र विशेषरूपेण संसर्गतायाः अप्रामाणिकतया द्रव्यविषयत्वविशिष्टचाक्षुषत्वादिना यस्या कार्य
तावच्छेदकत्वोपगमे नोक्तव्यभिचारवारणसंभवात् लाघवेन पर्याप्तिनिवेशएव दर्शित इति। एवं स्वावृ
त्तित्वं कारणत्वाविशेषणमुपेक्ष्य स्वानिरूपितत्वं जन्यताविशेषणं तत्सामान्यावसंखिपमुपात्तमिदं त्ववा
धेयमित्यादिना तद्बाधरितं स्वेवासाधारणत्वेन निवेशनीयत्वात् एवं मथुरानाथेन शरीरादिसाधारणकार
णतामादाय जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन कारणतामादाय चासिद्धितादस्थ्यवारणायानुभवत्वव्याप्यजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०रा० सवच्छिन्नत्वं कार्यताविशेषणं दरिति। अयदृश्यत्वावच्छिन्नकारणतापाश्चक्षुरिति तथा कथं दृष्टांतासिद्धिः
१३ प्रसज्जते। अत्र केचित्तु जन्यसत्वेन दृश्यत्वेन कार्यकारणभावमिति पाठ एव न भक्तो साहुः नवीनास्तु स्वावृत्तित्वं स्व
निष्ठप्रमितिकरणतावच्छेदकानवच्छिन्नत्वं तथा च दृश्यत्वावच्छिन्नजनकतायां चक्षुरादिनिष्ठप्रमाणतावा
वच्छेदकानवच्छिन्नत्वमक्षतमेवेति तद्व्याहतिसंगतिरित्याहुः। परे तु द्विविधं प्रत्यक्षत्वमाप्तत्वं प्रत्यक्षवृत्तिभे
दप्रतियोगितावच्छेदकत्वे सति प्रत्यक्षवृत्तित्वं तद्वृत्तित्वं च तत्र द्वितीयकल्पे यथाश्रितस्मरणेऽसिद्धिपरोयं ग्रंथः॥
स्वभिन्नशरीरादिरूपप्रमाणजन्यवृत्त्यनुमितित्वावच्छिन्नकारणतावत्वात्। एवमपि तादवस्थ्यपरासंगतिस्त
एकस्याश्चक्षुरादिव्यक्तेः तादृशकारणताश्रयचक्षुरादिव्यक्त्यंतरजन्यवृत्तिकार्यताकत्वपास्वभिन्नशरीरादिरूप
(प्रमाणजन्यवृत्त्यनुमितित्वावच्छिन्नकारणतावत्वात्। एवमपि तादवस्थ्य) विशेषणेन दुर्वारत्वात्। स्वावृत्तित्ववि राम
शेषणताश्रयचक्षुरादिव्यसंख्यावर्जीयादृष्टांतासिद्धेरेवदृष्टत्वमभिधानादिति चेन्न स्वावृत्तित्वानुपादाने दृष्टांतासि १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ड्डिमात्रं नाभिप्रेतं किंतु तद्भिन्नव्याप्तिस्मरणादिकमादायानुमितित्वमादाय स्वरूपासिद्धिरपीति तत्संगतेः।
अत्रैव तत्कल्पेतादृशज्ञानासत्त्वावच्छिन्नत्वं तादृशज्ञानविपर्यासावच्छेदकतावत्त्वं जन्यसत्त्वावच्छिन्नकार्यत्वं च तत्तये
नितादृशयोरेऽसंतरवेति नु भ्रमः अनुभवत्वव्याप्यत्वदलस्य तत्र व्यावृत्तिसंगतये जन्यानुयोगिकसमवायेन ज्ञा
नत्वसत्त्वादेरेव शरीरादिजन्यतावच्छेदकत्वात्तन्मते पर्याप्तसत्त्वाच्च। न चैवं परामर्शस्यापि नाशकत्वसाध्य
कानुमितिसमानयोगिकत्वविशिष्टसमवायेनानुमितित्वस्य जन्यतावच्छेदकतया तादृशज्ञानविपर्यासावच्छेदकताक
जन्यताभक्त्वस्य व्याहतत्वमिति वाच्यं तथा सति जन्यतायां तत्सक्षकत्वानवच्छिन्नत्वेनासर्पात्। अत्रेदमवधेयं जन्या
नुयोगित्वविशिष्टसमवायत्वादिना संसर्गतया असत्त्वाज्जन्यज्ञानत्वं जन्यसत्त्वं च यथायथं कार्यतावच्छेदकमितिज्ञा
तिपर्यासमूपादानादेव न तद्दोषः। न चैवमनुभवत्ववृत्तित्वं व्यर्थमिति वाच्यं। संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन कारणता।
याश्शरीरादेः प्रमाणत्वेन तत्सार्थक्यात् तन्मथुरानाथात्मपक्षीभूतव्याप्तिस्मरणादेः तत्र कारकपक्षसत्त्वावच्छिन्न।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी०
१४

जनकतयास्वरूपासिद्धिः॥ चक्षुरादिप्रमाणांतरजन्यवृत्तिकार्यताकत्वादृश एवं कालत्वेन कार्यत्वेन द्रव्यत्वेन जन्यसत्वे
नव कार्यकारणभावमादाय चक्षुरादेरपि त्वगादिप्रमाणांतरजन्यकार्यताप्रतियोगिककारणतया दृष्टांतासिद्धिश्च
त्वतः प्रत्यक्षत्वव्याप्यजातिमत्वावच्छिन्नत्वं सहकारिताघटककार्यताविशेषणं प्रत्यक्षत्वव्याप्यत्वं च प्रत्यक्षवृत्तिभेदप्रति
योगितावच्छेदकत्वे सति प्रत्यक्षवृत्तित्वं तेन पक्षीभूतयानुस्मरणादेरपि परामर्शपक्षताद्यजन्यकनिरूपकत्वस्वभिन्नप्रमा
णाजन्यत्वसत्वानुमितितावच्छिन्नकार्यताककारणत्वेपि न स्वरूपासिद्धिः॥ स्वभिन्नप्रमाणत्वघटकानुभवव्याप्यजाति
वच्छिन्नत्वं वानारशानामिति पर्याप्त्यवच्छेदकतावाकत्वं परामर्शादिकार्यतानतया एवं च प्रत्यक्षवृत्तित्वं न दयं तादृशजा
त्यवच्छिन्नत्वं तु मुख्यविशेष्यविधया समवायसंबंधेन तेन व्याप्यस्मरणादेः कार्यतावच्छेदककोटौ प्रत्यक्षत्व
स्यानुकूलत्विधूमत्वादेः प्रवेशेऽपि नासिद्धिः॥ स्वभिन्नप्रमाणत्वघटकाकरणतायां स्ववृत्तित्वदानायाज्ञानादि राम
यत्नांतरजन्यानुमितियक्तिमादाय नासिद्धिः॥ न च तथापि महत्वे व्यभिचारः॥ प्राचीनमते द्व्यणुकेऽक्रिकप्रत्य १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षत्वावच्छिन्नंप्रतिद्रव्यवृत्तित्वविशिष्टंलौकिकविषयतासंबंधेनप्रत्यक्षत्वावच्छिन्नोवाज्जनकतयानिरू।
क्तासहकारित्वसत्वादितिवाच्यं।तन्मते असाधारणस्पर्शारिदात्मसंबंधानवच्छिन्नत्वत्वमहत्त्वाद्वृत्तित्वसा
पिकारणतायांनिवेशात्।नचतथाप्युद्भूतरूपेव्यभिचारस्तस्यप्रानसेतरद्रव्यलौकिक–त्वसक्षत्वावच्छि
न्नेजनकतयानिरूक्तासहकारित्वसत्वादितिवाच्यं।तस्यलाघवेनद्रव्यलौकिकचाक्षुषत्वावच्छिन्नंप्रतेव
जनकत्वात्मीमांसकैर्वायोःप्रत्यक्षत्वोपगमात्।उक्तरीत्यैवाधिकानांतुरूपाद्वृत्तित्वमपिसमंतरलेकारणतायां
महत्त्वात्वृत्तित्ववद्विशेषणमित्याहुः।तन्नप्रमाणत्वघटकजातिमर्यादिविपक्षएवनिनिर्भरः।एवंयद्भूतरूपे
व्यभिचारंमूर्तत्वचाक्षुषत्वंतत्त्वमतावच्छेदकमंगीकृत्यवारयति।नचेत्यादिनामूर्तत्वेतिद्रव्यलौकिकचाक्षुषत्वं
तुनतत्कार्यतावच्छेदकं।आकाशादेश्चाक्षुषाप्रसिद्धेस्तत्साधारणद्रव्यत्वेननिवेशेप्रयोजनाभावात्।नचमूर्त
चाक्षुषत्वस्यतथात्वे।अननुगमः।मूर्तत्वस्यजातिरूपत्वाभावादितिवाच्यं।उद्भूतरूपवत्त्वस्यैवतत्रमूर्तत्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰टी॰ महत्त्वावृत्तित्वं चंद्रे यमित्याशयेनाह एवमिति। परेतु मद्गुरुमते संतरद्ले कार्यतापंक्तौ लौकिकविषयतानव
१४ च्छिन्नत्वविशेषादेव चक्षुःसंयोगादौ व्यभिचारवारणसंभवात् मनोत्मप्रमाणांतरासहकारित्वदलं कारता।
यां तादात्म्यसंबंधानवच्छिन्नत्वं च अर्थांनचक्षुःसन्निकर्षे व्यभिचारवारकं वहिः पदमर्थमिति वाक्यं। तत्र च
हिर्निष्ठलौकिकविषयतानवच्छिन्नत्वस्य निवेश्यत्वात् यत्तु प्राचीनके मते सामान्यलक्षणायाश्चाक्षुषप्रत्यक्षका
रणत्वाद्व्यभिचारो न ईदृशप्रयासइतितन्नोते। सामान्यप्रत्यासत्त्यनुपगमात् नव्यमते प्रत्यक्षत्वस्य सामान्यलक्ष
णाकार्यतावच्छेदकत्वेन स्वमतेपि व्यभिचारवारणायोगाच्च तत्कार्यतावच्छेदकशरीरे लौकिकविषयतानिवे।
शावश्यकतया विषयतानवच्छिन्नत्वविशेषणेन तद्वारणसंभवाच्च एतेन मायमते व्यभिचारवारणायेवं
प्रयासः अत एव ग्रंथकृता हृद्याहत्त्रित्वं कारणतायां तदर्थविषयासमिति वदंति। तन्न स्वयं द्रव्यचा एम
क्षुषत्वादिनालौकिककार्यतावच्छेदकत्वाभिधानाद्विषयतानवच्छिन्नत्वविशेषणेन तद्वारणायोगा १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्प्रमाणांतरासहकारित्वस्यावश्यकत्वात् शाब्दफलानुपधायकेतिहेतुगर्भं अत एव जगदीशेने
दं व्याप्तिस्मरणमितिदं पदमुपात्तं यत्तु जगदीशेन स्वाहत्ति धर्मावच्छिन्नप्रमाकरणतानिरूपित
कार्यतावच्छेदकीभूतमानसज्ञानाहत्तिजात्यवच्छिन्नकार्यतानिरूपकत्वं प्रमाणांतरासहकारि
त्वमभिधाय व्याप्तिलौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव मायामनेउपनायकज्ञानसहेतुतया व्याप्तिस्मर
णेस्वरूपासिद्धिवारणाय मानसाहत्तित्वप्रवेशइत्यभिहितं तदसत् इंद्रियत्वरूपस्वाहत्तिधर्मावच्छि
न्नकारणतानिरूपितकार्यतायामनोनिरूपितत्वेनैव ग्रंथकृतां वारणसंभवात् भवतां निरुक्तप्रमाणां
तरासहकारित्वनिवेशनायप्रयासो गौरवादिति । प्रमाणांतरेति संयोगाभ्यत्वेन प्रमाणां विशेषणीयं तथे
तिस्वभिन्नमनोभिन्ननिरूपितजन्यतावच्छेदकावृत्तिस्वपत्वादेःस्वभिन्नचक्षुरादिमतां तरजन्यतावच्छेद
कतात्पर्याप्तिमत्वेनोपनायकज्ञानजन्यतावच्छेदकीभूतप्रत्यक्षत्वस्य मनोभिन्नेंद्रियत्वावच्छिन्ननिरू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०री० पितकार्यतावच्छेदकतापर्याप्तिमत्त्वेनचासिद्धेकाधृतप्रसक्षत्वसत्वमनोनिरूपितत्वयोर्निवेशः।इंद्रिय
१५ त्वंचमनस्त्वधरितधर्मस्यैवत्तिनाभिमतंग्रन्थसंगतिः।व्यापारवदिति।व्यापारवत्वेसत्यसाधारणफलोप।
हितकारणत्वमित्यर्थः।असाधारणफलोपहितकारणत्वंचस्वजन्यानुभववत्वस्याप्यज्ञातस्वच्छिन्नकार्यता
विशिष्टेवहिर्गोचरप्रमाविशिष्टत्वं।अनुमित्युपधायकेऽव्याप्तिंवारयति।अनुमिताउक्तापाद्यसत्वेनव्या
पारवदसाधारणकारणत्वासत्वेन।आलोकसंयोगोआपाद्यासत्वेनविशेषणपूरणस्यावश्यकत्वात्इंद्रिया
संगसन्निधाने।आलोकादौकृतेनप्रमाणव्यवहारइत्याशंक्यव्यापारकत्वेसत्यसाधारणकारणत्वमा
त्रेणनतदवच्छेदकंतथासत्यालोकादौतद्विरहानुपपत्तेः।किंत्वासाधारणकारणत्वेव्यापारवत्वेचसतिप्रमा
णांतरासहकारित्वमित्याहप्रमाणेतिकारणेतिकरणत्वंसेति।व्याप्तिस्मरणसमानस्यपरामर्शप्रतिका। राम
रणत्वमेवाव्यंसत्वादितिभावः।यस्मात्साध्यंपेतुलैकेप्रत्यक्षंप्रत्युपनायकज्ञानस्यकारणत्वानुमित्यादे १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चसव्याप्यत्वयाऽपादकासिद्धिर्यज्जातिशब्देनज्ञानत्वादिकमादायव्यभिचारस्तत्रेसत्त आह यज्ज्ञातत्वा
च्छिन्नेतिकरणतान्वयि। चाक्षुषत्वाद्यवच्छिन्नकरणताघटितं च नापादकमित्यनुपदं स्पष्टं किंतु प्रत्यक्ष
त्वावच्छिन्नकरणताघटितं तु नापादकमित्यनुपदं) इष्टापत्तिवारणायानुमित्यादित्वि। आदिनाशब्दबो
धपरिग्रहः। तज्ज्ञातीतिगौरवमस्वरसः। सुखादिमनःसन्निकर्षवारकं तां वहिः। यस्साह वहिरिति। प्रत्यक्ष।
त्वावच्छिन्नमनोमकारणासमवहिते वहिर्विषयस्मृत्युत्पादके व्यभिचारः। इष्टापत्तिवारणायापाद्यस्य प्र
माघटितत्वात्तः प्रमापदमनुभवार्थकं। उपगमादित्वि। तादृशसामग्रीपदेनानुमितिसामग्र्युपादानेष्टाप
त्तिः। उपनीतेति। उपनीतविषयत्वविशिष्टं नप्रत्यक्षं साक्षात्त्वेनागृह्यमाणत्वात्। उपनीतविषये इतियस
न्निकर्षाजन्यत्वाद्वेति शेषः। योगः ज्ञानलक्षणाया अप्रत्यासत्तित्वादिति भावः। ननु वहिर्विषयकप्रमाया प्रत्यासत्त्वा
रणत्वाभावादकंतद्व्यापारवत्ताघटितं नव्यापारिवत्साधारणपयटितार्थका। पूर्वोक्तापत्तिज्जनकपिलं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० व्यापारवत्त्वघटितं तु तन्नियमस्य तत्त्वापाराभावेनासंभवी निनियतव्यापाराभावेनेत्यपि महलेन वक्ष्यते अ
१६ सत्तु प्रसक्षत्वविरुद्धजातिमत्त्वप्रमाहेतुत्वापादकस्य निरासो न संभवतीत्यत आह तन्नचेति। साक्षात्त्वमि
ति। एवं च प्रसक्षत्वरूपजातिगर्भापादकासिद्धिरिभावः। इत्यादयइत्यादिनाग्रेमेणान्वयः। न चांशिको
पनीतभाने प्रसक्षत्वोमानाभावइत्यत आह अंशिकेति। न चांशिकोपनीतभानासंग्रहेपि नक्षतिः तत्र वि
शेषणज्ञानविधया पूर्वोपनयापेक्षासंभवादिति वाच्यं। अहं सुखी भूतलं च घटवदिति लौकिकालौकिकमा
नसे भूतलज्ञानानपेक्षाप्रसंभवादिति वाच्यं। गात् तस्य भूतलविशिष्टबुद्धित्वाभावात्। तादात्म्येन भूतला
देः प्रकारत्वमुपगम्य तद्विशिष्टधीत्वोपपादनेत्र पुनायकत्वानकारणतायाएवासिद्ध्यापत्तेः। जातिविशेष
स्य कार्यतावच्छेदकताप्रसक्तत्वात्प्रमाणां न रक्तापत्तेरनवकाशः। असदेवेति। उपनयनस्य स्वजातीयप्रमा राम
त्वस्यैवोपगमात्। करणत्वइति। तथा च बाधकाभावविशिष्टविजातीयप्रमाहेतुत्वमेव विजातीयप्रमा। १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करणत्वसाधकमिति भावः ॥ यत्तु जगदीशेन फलायोगव्यवच्छिन्नकारणत्वसाधकमित्युक्तं तन्न नियतव्या
पाराभावेन प्रधायामकरणत्वादिति ग्रंथासंगतेः ॥ व्यापारवत्त्वघटितकरणत्वासिद्धेरुक्तकरणत्वसिद्धावि
रोधित्वाद्ग्रंथकारमते तत्करणताव्यवहार एवापाद्यः ॥ अग्रे च व्यवहारविषयतावच्छेदकाभावान्नतदा
पादनसंभव इति निरासानासंगतिः ॥ ज्ञानस्येति ॥ मूले निद्रादिपदस्य तत्कालीनज्ञानपरत्वमिति भावः ॥ योग्य
तादीति ॥ अतीन्द्रियं इंद्रियसन्निकृष्टमपि योग्यताशून्यं तद्भिन्नं योग्यमपि इंद्रियसंयोगशून्यं आदिनालोक
संयोगघटितसामग्रीलाभः ॥ विशिष्टानुभवरूपत्वे हेयत्वशाब्दप्रमेयत्वनिरहष्टांतानासंगतिरतः संसर्गविषयकेति ॥ संश
यस्वप्नयोः परोक्षज्ञानत्वप्रसक्तेः ॥ प्रत्यक्षेति ॥ अवजनापत्तादिति ॥ तत्र दोषाभावादिति भावः ॥ आदिपदेनासं
सर्गाग्रहसहितयोर्धर्मिस्मरणकोपनुभवयोर्लाभात्रयोः स्थलभेदाभिप्रायकृतामाह धर्मिणीत्याधर्मधर्मिणो
रनुभवे अक्षादेः स्मरणेनुसंस्कारादिसत्त्वयोजनासंभवात्स्वयं धर्मिज्ञानं चेति स्मरणं चेत्तत्र नयोक्तिं ताकथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० मितिमूलं इंद्रियासन्निकृष्टधूमे सधूमो वह्निव्याप्य इति स्मरणाभाववद्दशाभिप्रायकं। उक्तिसंभवादिति।
९७ तावतैव विशिष्टपरामर्शस्याभिचारोद्धारादिति भावः। परिशेषः। विशिष्टपरामर्शहेतुत्वे सति किंचिन्नि
ष्ठत्वं कारणतानिष्ठमित्याह यासाविति केचित्तु साध्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वमनुमितिकारण
तावच्छेदकं। स्वसमानाधिकरणत्वस्वावच्छेदकधर्मांतरासमानाधिकरणत्वोभयसंबंधेनानुमितिमा
त्रवृत्तिकार्यतानिरूपितकारणतावत्त्वात् अंतरपदं स्वभिन्नत्वलाभायेत्याहुस्तन्न्वितं व्याप्यतावच्छेदक
प्रकारकज्ञानत्वेनोक्तज्ञानद्वयं स्फुटीकरोति व्याप्यतेति। गुरुत्वान्वयायज्ञानत्वावच्छिन्नस्येति। स्थलेपि।
सत्त्वेन दुरुत्तरत्वलाभः। तृतीयमिति। अनुमितिरूपत्वेनुमितेर्विलंबाधिकं स्मृतिरूपत्वे संस्कारस्य नियत
मत उद्बुद्धत्वं स्वीकार्यमित्याशयः। अथेति मूलं धूमत्वसामानाधिकरण्येन पर्वतीयत्वज्ञानदशायां पर्वती राम
यत्वावच्छेदेन वह्निव्याप्यत्वसंशय इत्यर्थः। पर्वतीयत्वावच्छेदेन वह्निव्याप्यतासंशयेपि वह्निव्याप्यत्वावच्छे ९७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दकत्वेनगृहीतधूमत्वस्यपर्वतीयत्वसामानाधिकरण्येनज्ञानविशेषदर्शनापप्रतिबंधकं धूमः पर्व
तीयइतिज्ञानस्यपर्वतीयत्वसामानाधिकरण्येनधूमत्वावगाहित्वादितिसमाधत्ते धूमइति। तस्यप्र
तिबंधकत्वानुपगमे तादृशसंशयोत्तरं परामर्शोत्पादं प्रसंजयति अन्यथेति। तत्र संशयस्य प्रतिबंध
कत्वोपगमेतुस्वमतेतस्यानुमितिप्रतिबंधकत्वमहाशंशयेनेत्यादितुभ्यमिसंधेनेत्यादाधर्यासंशयोत्सा
दस्यवावश्यकत्वेनतदाशंकाया असंगतिमाह अतएवेति। पुरस्कारः तन्निष्ठधर्मितावच्छेदकताकत्वं नि
श्चयपामात्रेतिमात्रपदं सामान्यधर्मपुरस्कारेणविरोधिनिश्चयस्यानिवर्तकत्वं व्यंजकं। तादृशसंशयनि
रासवैयर्थ्यशंकावारणायानुमितिरितिदुर्वारइति। तस्य पर्वतीयत्वसामानाधिकरण्यावगाहित्वात्।
सामानाधिकरण्येनधूमत्वदर्शनसाक्षिकं विलक्षणादिति भावः। पर्वतीयत्वेति। अनयाव्याप्तिभयेनेति शे
षः। युद्धेतितद्धर्मावच्छेदेनविषयतानिश्चयस्यतद्धर्मघटितधर्मावच्छिन्नेनतद्व्याप्यज्ञानाविरोधित्वेपित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० सामानाधिकरण्येन विपरीतनिश्चयस्य धर्मावच्छेदेन तद्वज्ज्ञानं प्रत्येव विरोधित्वादिति भावः ॥ ननु प।
१९ क्षवह्निधूमत्वविशिष्टे व्याप्तिवैशिष्ट्यज्ञानमादाय न नैयायिकानुमुदेश्यसिद्धिरपसिद्धांतग्रस्तत्वादित्यतो
मीमांसकैः धूमः पर्वतीय इति ज्ञानस्य विशेषदर्शनत्वनिर्वाहं पर्वतीयत्वसामानाधिकरण्येन धूमत्वाव।
गाहित्वं पारदर्शनियमबलादुपेयं तादृशनियमादेव नैयायिकसिद्धविशिष्टपरामर्शस्य संशयनिवर्तकत्व
माहुर्वस्तुतस्त्विति। अविरोधित्वे पीत्यनेन द्रव्यत्वसमानाधिकरण्येन गंधादिनिश्चये पृथिव्यमद्रव्यत्वाव।
च्छेदेन गंधाभावसंशयउपपादित ॥ स्वयं यत्र पदवच्छिन्न इति दिधिसनुसारेण न च सामान्यनिश्चयस्येता
दृशं कार्यं धूमत्वावच्छेदेन व्याप्तिनिश्चयाद्धूमत्वावस्य व्याप्यत्वसंशयानुत्पादोपमेनेन पर्वतीयधूमत्वाव।
च्छेदेनाव्याप्यत्वसंशयोपपादनस्य व्यावर्तकधूमत्वदर्शनस्य पर्वतीयत्वावच्छेदेनाव्याप्यत्वसंशयविरोधि राम
तामात्रप्रदर्शनोत्तरमयुक्तत्वमाशंक्यानद्रूयस्यधूमत्ववच्छेदेन व्याप्तिनिश्चयस्य पर्वतीयधूमत्वावच्छेदेना १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽव्याप्यत्वशंकाविरोधित्वेपि नस्मानुसर्यमुपदर्शितं येन तद्धूमस्य पर्वतीयत्वावच्छेदेनाव्याप्यत्वशंकाविरो
धिव्यावर्त्तकीभूतधूमत्वदर्शनपरतामन्त्वं ननु तत्रत्यधूमत्वावच्छेदेनव्याप्तिस्मरणस्य पर्वतीयधूमत्वावच्छे
देनाव्याप्यत्वसंशयविरोधितापरत्वमप्यसंभवादिति नचैसादिशंकायां व्यावर्त्तकीभूतधूमत्वदर्शनात्पर्व
तीयत्वावच्छेदेनाव्याप्यत्वशंकानुत्पादोपगमेनैव पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वसंशयमुपपादयंतीति न
मतमाह परेत्विति। मफदिनाति। माभूदितिसंनसस्य सर्वः। तेन सामान्यनिश्चयस्येति शाब्दार्थोऽयं तद्गतीभवति।
ननुशंकापूर्वग्रंथस्य पर्वतीयधूमत्वावच्छेदेनाव्याप्यत्वशंकाविरोधिधूमत्वावच्छेदेनव्याप्तिनिश्चयेन नासर्वं
तदाय च हेत्वसादिसमाधानासंगतिरित्याशंकातत्समाधानामवतारयति समाधेति। सामान्येइति। तथाच पर्वा
वर्वतीयत्वमात्रेण धूमत्वदर्शनस्य पर्वतीयत्वरूपसामान्यधर्मविशिष्टविशेष्यकतया तादृशसामान्यधर्मविशि
ष्टेऽव्याप्यत्वसंशयविरोधित्वं नत्वेवं न तत्पर्वतीयधूमत्वरूपविशेषविशिष्टविशेष्यकतया तादृशविशेषधर्मः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा०टी० विशिष्टेऽव्याप्यत्वसंशयंप्रसपिविरोधित्वनिश्चयान्नसामान्यइत्ससंसर्गेपर्यंतत्रविशेषधर्मावच्छेदेनाव्याप्य
२० त्वसंशयस्यसामान्यधर्मसामानाधिकरण्येनाव्याप्यत्वज्ञानतयाप्रवृत्तीयत्वसामानाधिकरण्येनधूमत्वज्ञानस्याव्यवि
रोधित्वशंकावारणायसमानप्रकारकत्वंप्रतिक्षिप्यसमानविषयकत्वेनविरोधित्वमादतंतत्रयासस्याहतस्यावेति।
भिन्नेतिसामान्यलक्षणानुपगमेनधूमोवह्निव्याप्यइतिस्मरणस्यपर्वतीयधूमविषयकत्वासंभवात्।तथाच
तथाविधस्मरणस्यैवविशेषधर्मावच्छेदेनाव्याप्यत्वसंशयनिवर्त्तकत्वंतासपंतिहेत्यस्यकुत्रोनास्तीतिभावः
व्याप्यतयासंस्कारवारणायाहतादृशेतिभ्रमसंशयइतिदाधितेर्नानाहार्यसंशयइत्यर्थमाहतदभावेनेति।न
चेच्छारूपकारणविरहादप्रसिद्धिरनाहार्यसंशयोमाभूत्धर्मितावच्छेदकतासंवंधेनानाहार्यस्याणुत्व
संशयस्यस्वस्याणुत्वाभावेदुर्वारइतिवाच्यं।तन्मतेधर्मितावच्छेदकतासंवंधेनानाहार्यस्याणुत्वज्ञानंप्रतिस्वा राम
णुत्वाभाववत्त्वविषयतासंवंधेनज्ञानसामान्यस्यप्रतिवंधकत्वात्।प्रतिवंधकतापिविसमवायेनेत्यादि २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संशयानुसारेणानुभवो हेतुरतः स्मृत्यसिद्धिरनुभवबलादिति। तर्हि धूमत्वावच्छेदेन व्याप्तिज्ञानानुमितिस्त
त्रस्वरूपसंबंधरूपतदवच्छेदकतायाः अप्रामाणिकतया। अन्यथा स्वाश्रयसापेक्षेरित्यत्र आह मीमांसकानामि
ति। अनतिप्रसंगाय कालिकादिसंसर्गकज्ञानस्य प्रतिबंधकत्वादिवारणाय स्वाश्रयत्वाभावांशे संशयत्वस्येपि पु
रुषत्वविशिष्टे स्थाणुत्वाभावावगाहितायाविरोधिताभावाज्ञत्व एव तदंशे संशयत्वात्स्वविरोधिताबाज्ञत्वं घट।
टे तुल्यत्वादिति। अस्माकं तु पुरुषत्वविशिष्टे स्थाणुत्वानवगाहित्वविशिष्टपुरुषत्वविशिष्टे स्थाणुत्वाभावावगा
हित्वस्य विरोधिताप्रयोजकतया न घटादिसंशयत्वतुल्यत्वमिति भावः। बाधेपि धर्मितावच्छेदकविशिष्टप्रकारण
भावावगाहिताया विरोधिताबाज्ञत्वमेवस्याप्यपतिष्ठतेनेति। संसर्गेति। संशयत्वमात्रस्याविरोधिताबाज्ञत्वा
भावात्प्रकाराशेति। तत्त्वस्मृतिसाद्दृश्य प्रतिबध्यतानामपि धर्मिणि प्रकाराभावावगाहित्वमेव तत्र मिसाहत्य
क्विचारधिय इति। बाधेप्याह एवमिति। अनुद्बुद्धसंस्काराणामसविषयत्वेन प्रतिबंधकत्वेत्याह उद्बुद्धेति। धूम।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० त्वेति। पर्वतीयधूमत्वावच्छेदेनवह्निव्याप्यत्वाभावसंशयमधिकृत्यनचसामान्यनिश्चयसत्त्वेतिग्रंथः तदवच्छे
२१ देनवह्निव्याप्यत्वाभावभ्रममधिकृत्यनवधूमत्वपुरस्कारेणेत्यग्निमग्रंथः उभयत्रापिधूमोवह्निव्याप्यइतिस्मर
णमेवविरोधितयासमाधानेदर्शितमितिविपरीतज्ञानमात्रस्यप्रतिबंधकत्वलाभः। वस्तुतस्त्वितिमूलं। वस्तु
तोऽनुमितिरेवभवतिनतुसंशयःमुकारस्याऽर्थःसंशयसत्त्वेऽनुमितिरनिष्टानतुतदसत्त्वेइतिभावः भावत्व
संशयेपीति। इच्छांविनेत्यादिः अत्रापीति। इतरभावोऽभावोवितियपक्षधर्मतायाप्यरूपेणपर्यायेणनिश्चयः तयोरे
वरूपांतरेणतन्निश्चयस्यसिद्धांतयिष्यमाणत्वादितिभावः। यद्धर्मिकेति। वैयधिकरण्योद्धारः। व्यतिरेकज्ञा।
नसामान्यप्रवेशेत्वाह। व्यभिचारज्ञानसामान्येति। अत्रयत्संशयव्यतिरेकनिश्चयोपूर्वत्रिप्रतिबंधकोतन्नि
श्चयसत्त्वेऽनुमितेर्व्याप्तिरिवेतिप्रत्यक्षमूलं। अत्रयत्तद्ज्ञापकव्यतिरेकज्ञानत्वव्यापकप्रतिबंधकताकत्वात्तन्नि राम
श्चयतावच्छिन्नजन्यत्वयोर्व्याप्तिःप्रहत्तिःपक्षः तत्रप्रमास्यव्यतिरेकज्ञानत्वव्यापकप्रतिबंधकताकत्वहेतु २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाफलसाधनताज्ञाने भ्रमात्वनिश्चयत्वेन हेतुतासाध्या। ईश्वरज्ञानमादाय सिद्धसाधनवारणाय ईश्वरानं

गीकारकर्तृवादिमते ऽर्थान्तरप्रसंगवारणाय वा तन्निश्चयत्वावच्छिन्नजनकतायाः साध्ये ऽन्तर्भावः। न च पराम

र्शेण व्याप्तिनिश्चयो ऽप्रमया सिद्ध इति हेत्वंशासिद्धिरिति वाच्यं। अवच्छेदकतापर्याप्तेर्निवेशेन पक्षधर्मत्वावगा

हितायाअधिकत्वेविपरामर्शवृत्तिजनकतायाएवतादृशत्वात्। ननु सामान्यत्वाभोयावद्विशेषोपादानादेव

भवति। न चेह तद् इतियाथाभावेन तद्द्वेदकोटिकसंशयस्य व्याप्तिसंशयत्वाभावेन यत्संशयपदेनोपादानासं

भवात्। किंच यत्संशयपदं यद्रूपावच्छिन्नविषयकसंशयपरमेव स्वंवाच्यं व्याप्तिसंशयसामान्यांतर्गतानां

किंचिद्रूपेणव्याप्तिप्रकारकतानासंशयानवनामनुमित्याद्यावधतिबंधकत्वात् वक्ष्यमाणरीत्या संशयसा

मान्यविवक्षासत्वात्। एवं च व्याप्यभावाभाववत्तेन व्याप्तिकोटिकव्याप्यभाववत्संशयस्याप्यसंग्रहः। व्याप्तित्वावच्छि

न्नसंशयत्वाभावात्। तथा च कथं व्यतिरेकज्ञानत्वेन निवेशसंभव इति चेन्न। तत्रेराधिताचे व्यतिरेकपदस्य।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० २२ तिरेकनिश्चयसंशयत्वेनोभयोपादानसंभवात् । अत्र दीधितिकृन्मतेऽतिरेकसंशयपदलेऽप्येवं व्यतिरेकनि
श्चयपदलेऽप्येवं हेतुघटकतालंतरस्य सामान्यपदोपादानसूचकत्वेन व्यर्थत्वात् तथा दिग्राह्याभाववत्तानिश्च
यात्मकव्याप्त्यादिसंशयप्रतिबंधे घटवत्ताज्ञानोदेशघटवत्तानिश्चयजन्मव्यभिचारवारणाय पत्संशयादिपदं त
त्सामान्यपरं न च यत्संशयत्वेन व्यतिरेकपदव्यर्थतासाधुत्वभावसंशयत्वेन व प्रतिबंधकत्वं अवच्छेदकत्वं स्वरूपसंबं
धविशेषणीसांप्रतं व्याप्तिसंशयपादे कोऽस्यभाववन्निश्चये ऽतिरिक्तोपि विधंकत्वक्रमनाभयेन व्याप्यभाववज्ज्ञानत्वे
नैव प्रतिबंधकत्वात् च तयेव विवक्षितामिति व्याच्यं व्याप्यभावघटाभावोभयवान् धूमइतिज्ञानप्रतिबंधेन तद्विशे
ष्यघटवत्ताज्ञाने व्याप्तिनिश्चयाजन्मव्यभिचारात् न च यद्भावप्रकारिता तेनावच्छेदकता विवक्षणीयाः व्याप्यभा
ववत्व धूमोघटाभाववानिति निश्चयमादाय व्यभिचारात् विनिगमनाविरहेण तत्र प्रतिबंधकतायां व्याप्यस्यभाव गम
प्रकारितावच्छिन्नत्वात् न चावच्छेदकतामप्रकारितावच्छेदणीया । व्याप्यभाववद्धूमकालीनघटवानितिज्ञान २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिबध्येतादृशघटाभाववत्ताज्ञानेव्यभिचारात् नचप्रकारतावच्छेदकविषयतैवतद्भाववच्छेदिकेतिवा
यं।एवमप्यवच्छेदकधर्मादर्शनादिमुद्रायाम्सभावज्ञानस्यघटवत्ताज्ञानविरोधित्वात्तद्भाववत्त्वेऽपिविशेष
णांतरस्यापिप्रवेशेमहागौरवात्। अव्यभिचारग्रहंप्रतितदभाववन्निश्चयत्वेनविरोधितयानद्दुरकाव्यभि
चाराभावज्ञानत्वावच्छिन्नप्रतिबंधकताकेव्याप्तिचमग्रहेव्यभिचारस्यदुर्वारत्वाच्च।नचभिन्नधर्मिकाणां
किंचिद्रूपेणचव्याप्तेरभावकप्रकारकाणानानासंशयानांसामान्यानगतानामनुमितावप्रतिबंधकत्वमदृष्टांना
सिद्धिरितिवाच्यं।साध्यघटकनिश्चयसमानधर्मितावच्छेदकपद्रूपावच्छिन्नाभाभावसंशयस्यवाच्यत्वा
त्।एवंचतद्घटकदलांतरोपादानवैयर्थ्यादितरपरोपादानवैयर्थ्यमेव।नचतादृशसंशयत्वव्यापकता
याव्यतिरेकज्ञानत्वव्यापकत्वादस्ततयातन्निवेशस्यमुचितइतिवाच्यं।तथासत्यनुचितगौरवापत्तेः।न
चपक्षव्यतिरेकज्ञानत्वेनप्रतिबंधकतानिवेशेऽपिस्वरूपसंबंधरूपावच्छेदकत्वस्यैवनिवेशोऽस्त्वितिवाच्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०टी० ग्राह्याभावज्ञानत्वस्य ग्राह्याभावनिश्चयत्वघटकतया ग्राह्यज्ञानप्रतिबंधकतावच्छेदकत्वात् ग्राह्यनि
२३ श्चयाजन्ये ग्राह्यज्ञाने व्यभिचारात् । न च यद्व्यतिरेकज्ञानत्वपर्याप्तप्रतिबंधकतावच्छेदकतानिवेशासंभ
वः ग्राह्याप्रकारकत्वविशिष्टग्राह्याभावज्ञानत्वे एव तत्पर्यवसितेरिति वाच्यं । प्रत्येकापर्याप्तस्योभयत्रपर्याप्त्य
भावात् व्यतिरेकज्ञानत्वत्वावच्छिन्नपर्याप्तिः संबंधो वाच्यः । तत्रापि चेदवच्छेदकत्वं स्वरूपसंबंधस्तद
तदाऽनवस्था अनतिरिक्तत्वे त्विलं चेत्तदा महागौरवात् । तथा च यद्रूपावच्छिन्नविशेष्यकयद्रूपावच्छि
न्नाभावप्रकारकज्ञानत्वव्यापकप्रतिबंधकताकं यत्तन्निश्चयत्वावच्छिन्नजन्यभिसर्थः । न चाव्यभिचार
व्यतिरेकरूपव्यभिचारस्य संशयो निश्चयश्चाव्यभिचारग्रहप्रतिबंधकः व्यभिचारसंशयप्रतिबंधकता
पाव्याप्तिग्रहे व्याप्ये मणिकारैरेवोक्तत्वात् तथा चाव्यभिचारव्यतिरेकज्ञानसामान्यप्रतिबध्यतन्निश्चया राम
जन्ये व्यभिचारग्रहे व्यभिचारो दुर्वारः इति चेन्न ग्राह्यसंशयस्याप्रतिबंधकत्वात् व्यभिचारसंशयस्य व्याप्तिग्र २३
हप्रतिबंधकतया संशयपदेन घटादिनिश्चयाहेतुके घटादिज्ञाने व्यभिचारस्य वारणेपि अव्यभिचारनिश्चया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मतन्निश्चये अव्यभिचारव्यतिरेकसंशयनिश्चयप्रतिबंधे अभिचारवारणार्थं प्रतिबंधकपदं सं
शयांदोपदर्भावत्वप्रकारकत्वेनेयसंविवक्षणीयं तत्प्रतिबंधकतायाश्चाव्यभिचाराभावत्वाप्रकारक
व्यभिचारत्वप्रकारकसंशयसाधारणतयादोषइत्यालोके उक्तं तदनुपादेयं। घटादिसंशयस्यतन्नि
श्चयघटत्वव्यभिचारसंशयस्यापि अभिचारनिश्चयेग्राह्यसंशयत्वाविशेषेणाप्रतिबंधकतयैव निर्वा
हान्तद्विवक्षावैयर्थ्यात् यन्मतमालंव्यमणिकृतं व्यभिचारसंशयप्रतिबंधकत्वाभिधानं घटादिसं
शयेनतन्निश्चयप्रतिबंधकतायाअपितन्मतसिद्धितयातद्विवक्ष्ययाघटेनिश्चयाहेतुकेघटत्वत्वाज्ञा
नेशंशयपयदेनव्यभिचारोद्धारस्यदुष्करत्वात् नचधूमः प्रमेयवानितिप्रमेयत्वेनव्याप्यस्याभावज्ञा।
नस्याप्रतिबंधकत्वात्साधनाप्रसिद्धिः यद्रूपावच्छिन्नाभावत्वेनप्रकारितानिवेशात्। अव्यभिचारा
भावाभावत्वेनव्यभिचारसंशयस्यग्राह्यसंशयतयाव्यभिचारशंकासमाधानं तत्रप्रतिबंधकतामतस्या।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वलंवनीयत्वात् एनत्सर्वमभिप्रेत्य निर्गलितं प्रदर्शयति। तत्त्वतस्त्वमिति। अत्रालोककारानुयायिनः
यद्व्यतिरेकज्ञानत्वेव्यापकप्रतिबंधकताकत्वनिवेशसंभवे पि यथाश्रुतमूलानुरोधेन प्रतिबंधकतावि
शेषणतया निश्चयोपादानमावश्यकं अन्यथा संशयपदवैयर्थ्यं स्यात्। अत्रापि घटाभाववन्निश्चयात्मक।
सांकुरुवि विशेषव्यतिरिक्तनिश्चयसामान्यस्य तत्किंचित्तदंकुरुसंशयस्य एवं तादृशनिश्चयात्मकसांकु
रुविशेषसंशयसामान्यस्य तादृशास्य यत्किंचिद्व्यतिरेकनिश्चयस्य च संभवेनांकुरनिश्चयाजन्मेघर
वत्ताज्ञानेव्यभिचार इत्यतः संशयनिश्चयोभयसामान्यं विवक्षणीयं। नन्वेवमपि तादृशांकुरुविशेषी
यसंशयसामान्यतद्व्यतिरेकनिश्चयसामान्योभयस्य घटाभाववन्निश्चयत्वं तत्र व्यभिचारो दुर्वार इति वा
च्यं। तादृशांकुरे प्रमाणाभावे सैवालोककृरिष्यणीसंमतत्वात्। नन्वेवमपि संशयत्वादिमध्ये ज्ञानत्वप्रवे

शात्संशयत्वादिवैयर्थ्यमिति वाच्यं। तज्ज्ञानत्वव्यापकताघटकात्प्रतियोगितावच्छेदकत्वाभावादस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सैवतस्यसंशयत्वाद्व्यापकतावच्छेदकत्वेनावैयर्थ्यात्।अत्रचव्यभिचारज्ञानस्यव्याप्तिनिश्चयेमणि
मंत्रादिवत्स्वरूपयोग्यप्रतिबंधकतानतुग्राह्याभावावगाहितया।कथमन्यथात्यंताभावगर्भव्यभिचारग्र
हस्यान्योन्याभावगर्भव्याप्तिधीविरोधिता।ग्राह्याभावावगाहितया।प्रतिबंधकत्वमेवचसंशयव्यावृत्त
मितिव्यभिचारसंशयप्रतिबंधकत्वंयुक्तमेव।एवंचयथाग्राह्याभावनिश्चयप्रतिबध्यघटवत्ताज्ञानेसं
शयपदेनव्यभिचारवारणंघटसंशयस्यग्राह्याभावावगाहित्वेनप्रतिबंधकताशून्यतयातत्रैवव्य।
भिचारसंशयस्यस्वतंत्रप्रतिबंधकतयातत्प्रतिबध्येव्यभिचारनिश्चयाजन्येव्याप्तिनिश्चयेव्यतिरेक।
निश्चयपदेनव्यभिचारवारणं।अव्यभिचारसंशयरूपतत्प्रतिबध्येव्यभिचारनिश्चयप्रतिबध्येचा
व्यभिचारनिश्चयाजन्ये:व्यभिचारनिश्चयेव्यभिचारवारणायपदभावत्वप्रकारकत्वेनेपक्षविशेषणं
चावश्यकं।परंतुनिश्चयपदलेग्राह्यभिन्नत्वेनपक्षसदार्थोविशेषणयोलाघवान्नतेनाव्यभिचारनिश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा०टी० येनव्यभिचारः।नैवंग्राह्यव्यतिरेकज्ञानाज्ञानप्रतिबंधेविशिष्टज्ञानमात्रेप्रसंदेनग्राह्यस्यदुर्धरता
२५ याव्यभिचारासंभवात्संशयपदवैयर्थ्यमितिवाच्यं।एकपदार्थापरपदार्थनिष्ठाभावप्रतियोगित्वंयो
ग्यतासाचग्राह्यभिन्नेतिनव्यतिरेकनिश्चयप्रतिबंधेविशिष्टज्ञानमात्रेप्रसंदेन)शाब्दबोधेव्यभिचार
वारणायसंशयपदोपादानात्योग्यतासंशयस्यनप्रतिबंधकइतितदसत्।यतः।एतन्मतेसकलव्य।
भिचारज्ञानेस्येवसर्वविधाव्यभिचारज्ञानेस्वतंत्रविरोधिता।अन्यथाग्राह्याभावावगाहितयाग्राह्याभा
वांतरसंशयवद्ग्राह्याव्यभिचाराभावसंशयस्यप्रतिबंधकत्वानुपपत्तेः।एवंचग्राह्याभावेतरैकविध
व्यभिचारधीप्रतिबध्येऽन्यविधव्यभिचाराभावग्रहेव्यभिचारोदुर्वारएवेति(तुच्छपदभावत्वप्रकारक
तानियतोयस्यप्रतिबंधकयव्यतिरेकनिश्चयःयत्प्रतिबंधकयत्संशयस्यपदभावत्वप्रकारकतानियतः राम
इत्येकहेतोपदभावत्वप्रकारकतानेयस्यस्यद्वेधाविवक्षाव्यर्थः।व्यभिचैसंशयस्यव्यभिचारनिश्चय। २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६

वेतरेकविधव्यभिचारधीप्रतिबध्येगम्यविधव्यभिचाराभावग्रहेव्यभिचारोदुर्वारस्येति नचपद्भावत्वप्रकारकत्वानिपत्तोप
प्रतिबंधकपक्षातिरेकनिश्चयः पत्प्रतिबंधकपत्संशयश्चपदभावत्वप्रकारकत्वानिपत्तः इत्येकहेत्तोपदभावत्वप्रकारक
त्वानैयत्यस्यहेत्वानिवेशोव्यर्थः व्यभिचारसंशयस्यव्यभिचारनिश्चयस्यचाव्यभिचाराभावत्वाप्रकारकतयाएकत्व
नतदुपादानेपिदर्शितव्यभिचारवारणासंभवादितिवाच्यंसंशयनिश्चययोः पदभावत्वप्रकारकत्वानैयत्यवैकल्पिक
त्वात्। अत्रसत्प्रतिबंधकपत्संशयत्वव्यापकपदभावत्वप्रकारकत्वाकत्वेसतिपक्षातिरेकनिश्चयत्वव्यापकप्रतिबं
धकत्वाकत्वमेकोहेतुः तेनपदभावत्वप्रकारकएवपत्संशयः पक्षातिरेकनिश्चयश्चपत्रप्रतिबंधकस्तन्निश्चयत्व
हेतुरित्यत्रनसाध्यसाधनविरोधः व्याप्तिग्रहेव्याप्यभावत्वव्यभिचारत्वावच्छिन्नविषयकौसंशयौप्रतिबंधकावितिसं
शयत्वव्यापकत्वप्रवेशः अन्यपत्संशयप्रतिबंधत्वमात्रनिवेशेसिद्धिविधपायज्ञानप्रतिबंधकपामनुमितौतन्निश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ टि॰
२६

पजन्यापंव्यभिचारेणन संशयत्वनिवेशो वाच्य एवेनत्विदानीं अनुमितिशाब्दबोधादिप्रतिबंधके समानाकारकसि
द्धिशाब्दबोधादौ स्वप्रतिबंधकयज्ज्ञानत्वसत्वेपि पदभावत्वप्रकारकताविरहादेवाहेयादित्ति वाच्यं पाटस्य विषय
विशेषे: नाद्यो संस्कारैकस्यापि न सिषाधयिषाद्यपमथ्यवर्ति सिद्धिभिन्न सिद्धिस्तन्न बाधमात्रमादाय पक्षवाविषयवि
शेषेपक्षताविच्छेदकस्यामानाधिकरण्येनेव समूहालंबनात्मकसिद्धिबाधनिपमः तत्र सामानाधिकरण्येनानु
मितौ नादृशसिद्धिमादाय व्यभिचारोत: संशयत्वनिवेशानावस्तुतस्तु व्याप्तिज्ञानत्वेन व्याप्त्यभावत्वप्रकारकत्वव्या
प्यव्याप्तिनिश्चयेपत्तदसत्त्वादिति साधनाप्रसिद्धिः नचतस्यत्वानुमितिप्रतिबंधकत्वे बाधादिसमूहालंबनात्मनस्तस्य त
थात्वादितितदुपादानां व्याप्तिकोटिकव्याप्यान्योन्याभावकोटिकसंशयेपातमेतु अनुमितिप्रतिबंधके तत्र व्याप्त्यभावत्व
प्रकारकत्वाभावेपि न क्षतिः पक्षसंशयेमुख्यविशेष्यतानिरूपितप्रकारतानापन्नाभावांशे प्रतियोगिसाक्षात्संबंधेन तत्प्रकार

राम॰
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कत्वस्यानिवेशनीयत्वात् स्वप्रतिबंधकव्यभिचारसंशयत्वव्यापकव्यभिचाराभावत्वप्रकारताके ऽव्यभिचारनिश्चयेतदज्ञ
न्यव्यभिचारवारणाय पद्व्यतिरेकनिश्चयप्रतिबंधत्वोपादाना स्वविरोधिविषयकसंस्प्रष्टालंबनात्मकधीत्वेज्ञानसंशय
त्वव्यापकघटाभावत्वप्रकारताकेताहृशसमूहालंबनात्मकघटव्यतिरेकनिश्चयप्रतिबंधेघटत्वज्ञाननिश्चयाजन्येऽव्यभि
चारनिश्चयेव्यभिचारोऽन्तर्जन्नतादृशनिश्चयत्वव्यापकत्वनिवेशः ताहृशनिश्चयत्वावच्छिन्नानिवेशस्तुनप्रकृतः अनुमि
तिप्रतिव्याप्यभावनिश्चयत्वेनप्रतिबंधकत्वेव्याप्याभावादिसंशयेपि पक्षप्रतिबंधकतानकल्पनप्रसंगाभयेनआस्यज्ञात
त्वानत्वेनैवप्रतिबंधकत्वात् यत्तु स्वप्रतिबंधकव्यभिचारसंशयत्वव्यापकव्यभिचाराभावत्वप्रकारताके सिद्धिविधपर
व्यभिचारव्यतिरेकनिश्चयत्वावच्छिन्नप्रतिबंधकताकेचव्यभिचारनिश्चयाजन्येऽव्यभिचारनिश्चयेव्यभिचारान्नस्वरू
पसंबंधरूपावच्छेदकत्वमितितदशुद्धमेवविषयविशेषेव्यापकत्वनिवेशपिदोषावारणात् वस्तुनस्तुव्यभिचारप्रत्यक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग दि.
२८

निरोपंप्रत्येवव्यभिचारसंशयःप्रतिबंधकःतत्रचनव्यभिचारव्यतिरेकनिश्चयःप्रतिबंधकइतिनकिंचिदेतत् अथपक्षमा
त्रेकदेशधर्मिकव्याप्यभावनिश्चयादिभेदेनप्रतिबंधकताभेदात्वकस्याप्यपिप्रतिबंधकतापोपद्रूपावच्छिन्नसंशयत्वस्यप
द्रूपावच्छिन्नाभावनिश्चयत्वस्यवाव्यापकत्वेनितदृष्टान्तासिद्धिरितिचेन्न एवंवघद्रूपावच्छिन्नत्वेनधर्षितावच्छेदकक
त्वेनसंशयनिश्चयपोनिवेशात् । अथकालिकादिसंबंधेनव्याप्यभावेप्रकारकसंशयेपविरहेपितत्संबंधेनव्याप्यभावनि
श्चयसंभवात्तत्रप्रतिबंधकताविरहेणसाधनाप्रसिद्धिरितिचेन्नादैशिकविशेषणतासंसर्गकत्वेननिश्चयविशेष
णात् पद्रूपावच्छिन्नप्रकारित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकविषयितानिरूपकत्वपर्या
प्त्यधिकरणसंसर्गावच्छिन्नत्वेनवाव्यतिरेकप्रकारितापादुपदर्शितपाजेनव्यभिचारादीनामस्मात् शत्वरूपसंबंधा
पगमेपिव्यभिचारनिश्चयसंग्रहात् नपदभावत्वप्रकारकत्वैवपर्यं अथयत्वप्रतिबंधकपत्संशयत्वस्यपदभावत्वप्रका

राम०
२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रकत्वव्याप्यत्वविवक्षणेऽनुमितिप्रतिबंधकपक्षधर्मत्वाभावनिश्चयात्मके मेयत्वद्रव्यत्वादिनाव्याप्तेः संशयेव्याप्य
भाववत्प्रकारकत्वाभावाद्दृष्टान्तासिद्धेः नचतस्यव्याप्यभावावगाहित्वेनास्तीतिवाच्यं ह्रदाद्यभावत्वेनव्याप्यस्याभावभा
नसंभवात् नचपटाभावत्वेनावगाहित्वविवक्ष्यतां तथासत्यनसंदेहवैयर्थ्यात् तदुपादानेपि व्यभिचारसंशयव्यभि
चारनिश्चयोभयप्रतिबध्यः व्यभिचारनिश्चयाजन्योव्यभिचारनिश्चयव्यभिचारानुसरणात् व्यभिचाराभावत्वावच्छिन्न
संशयएवतादृशाभावत्वप्रकारतासत्वात् । अथप्रतिबंधकतापापदाभावावगाहिताप्रयुक्तत्वेनिवेश्य अथप्रयुक्तत्वंदुर्व
चं । नतावदवच्छिन्नत्वं पक्षधर्मताविरहत्वेनव्याप्यभावावगाहितायाः अपिपक्षधर्मताविरहत्वावच्छिन्नावगाहितात्वेन
पक्षधर्मताविरहज्ञानप्रतिबंधकतायाः आवच्छेदकतयाव्याप्यभावावगाहिताप्रयुक्तत्वापत्तेः व्याप्यभावत्वादिनाऽव्या
वगाहिभ्रमेरपिविरोधितयावास्तवतदभावावगाहितात्वेनतदभावावगाहितायाः अवच्छेदकत्वविवक्षणासंभवात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग. टि. अत एव न व्याप्यत्वे उक्तधर्मानतिसाधारणप्रतिबंधकतायां तेन तदसंभवात् नापि व्यापकत्वे प्रमेयत्वादिना विरोधिविषयक
२८ ज्ञानस्याप्रतिबंधकतया विरोधिविषयतायास्तद्व्यापकत्वादिति चेन्न धूमाभाववज्ज्ञिपदभावविषयित्वावच्छिन्न
त्वमेव उत्तरोत्तरविशिष्टबुद्धिव्यक्तिं प्रति पूर्वपूर्वविशिष्टबुद्ध्यात्मकविशेषणज्ञानव्यक्तीनां ज्ञानजनकविशे दुर्गा
षणज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेन करणत्वस्य च नापत्तिः व्यवहितव्यक्तीनां तद्व्यक्तित्वेन कारणताया अप्रामा
णिकत्वात् अन्यथा उक्तनियमोपगमेऽप्यप्रतीकारादिति भावः तथा नियमानभ्युपगमोपि व्याप्तिज्ञानपरा
मर्शयोः करणव्यापारभावमुपपादयतां परामर्शस्य व्याप्तिविशिष्टज्ञानत्वेन व्यापारताभिमानिनां मत
मुपन्यस्यति यत्त्विति नृक्षतिः न प्रकृतक्षतिः व्याप्तिविशिष्टज्ञानतया अनुभवेन संस्कारेण वा जननादित्स
न्वयः विशिष्टज्ञानतयेति तृतीयार्थो अवच्छिन्नत्वं अनुभवेनेत्यादौ तृतीयार्थो निरूपितत्वं जननं जन्यतान्वे
था च अनुभवादिनिरूपिता विशिष्टज्ञानत्वावच्छिन्नजन्यताश्रयत्वादिति फलितार्थः स्मृतिं प्रति संस्कारद्वारा अनु
भवं प्रति साक्षाद्विशेषणधियः पूर्ववर्तितया स्मृतिसाधारणविशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञान
त्वेन हेतुत्वमिति मते पूर्वानुभावेनेति तद्रूपावच्छिन्नं प्रति विशेषणविषयकत्वेन संस्कारादिसाधारणेन हे
तुत्वेति मतमनुसृत्य संस्कारेणावेति विशिष्टबुद्धिं प्रति विशेषणविषयकत्वेन हेतुत्वे प्रकृते व्याप्तिज्ञा राम
नत्वेन करणत्वमुक्तनियमसत्वे निर्वहतीत्यत उक्तं तत्र करणतावच्छेदके ज्ञानत्वं परित्यज्य व्याप्तिविषय ८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संग इति वाच्यं एवमपि यत्र तादृशकोमलदंडत्रयसंवलनादेव घटाद्युत्पत्तिर्न तु तदुभयमात्रसंवलनात्
प्र तत्र तदुभयसंवलनादपि तदुत्पादसंभवो दुर्वारः व्यक्त्यंतरसंयोगस्य सहकारेण तदुभयसंयोगात्तदुत्पा
दनिर्वाहाय तादृशसंयोगे जातिभेदोपगमस्यावश्यकत्वात् एतेन दंडचक्रसंयोग एव तादृशजा
तिमत्त्वेन घटादिजनकत्वेऽपि निरस्तं दंडांतरसंयोगसापेक्षतया दृशा चक्रदंडसंयोगो चक्रं भ्राम्य
म तितन्निरपेक्षतत्संयोगव्यक्तितो घटाद्यापत्तेर्दुर्वारत्वात् प्रथमतश्चक्रसंयोगादिमत्त्वनिश्चयाभावे
न प्रवृत्त्यनुपपत्तेश्चेति चेन्न हि कोमलदंडादिसाधारणेन पृथिवीत्वेनैव भ्राम्यादिजनकता स्वीक्रियते
वि अतिप्रसंगभंजकः सहकारिविशेषो हि एवं प्रवृत्त्यतिप्रसंगमपि फलानुपधाननिश्चयाभावनि
ए करोति यदि चैवं लवत्तामिहालेनाभिहतमपि चक्रं भ्रांत्वा घटं न जनयति तदास्य दृढविलंबनदृव्यत्वे
ले वात धात्वं मूर्तत्वं जातिघ[illegible] तु न थैव तत्सामग्रीसहाये क्वादिपदमुपात्तमिति बोध्यं एवं कारण
भ्रमिजनकत्वं व्यवच्छिद्यते प्रथमोपस्थितत्वादिति जनकतावच्छेदकगुरुत्वस्यापेक्षणी
यतया भ्रमिजनकतामपेक्ष्य न दवच्छेदकस्य प्रथममुपस्थितत्वादित्यर्थः आवश्यकत्वादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० लिंग०
६०

नियतपूर्ववर्तितावच्छेदकधर्मस्यैवजनकतावच्छेदकात्मकतया अभिजनकतावच्छेदकतयाघटजनक
तावच्छेदकत्वे अभिजनकतावच्छेदकस्यतथात्वेवस्त्वकत्वादिसद्भावः ॥ तथाचजनकत्वावेनतादृशधर्म
स्यतथात्वापेक्षयाविशिष्टतथात्वेलाघवमितिभावः । अथागत्या अभिप्रति असंताजनकस्याभा
रणेनस्यत्त्वविलादिनाहेतुत्वेपिघटंप्रतिनत्वेनरूपेणातथात्वमुपेयते- असंताजनकव्यावृत्तेन अ
म्युपधायकत्वेनैवहेतुतासंभवात्कथंचित्तत्रम्युपधानान्निश्चयद[illegible]मायामेवघटार्थिनां[illegible]नि
ष्कंपायाः- अन्यदातदर्थिनांसकंपायाएव अन्यर्थिनांप्रवृत्तेस्वपगंतव्यत्वादिसत आह अन्यथेति अ
न्यथा। संताजनकव्यावृत्तयेरकजनकत्वेनापरजनकत्वोपगमे घटजनकत्वेनैवेतिविनिगमना
विरहादितिभावः- अन्योन्याभयेनचपरस्परजनकत्वेनउभयत्रजनकतानसंभवतद्व्यतिवोध्यं
दंडत्वेनकथितहेतुतामते- अतिर्ज्ञवृवीजंस्वयमेवाह- अतएवेति- अनुगतदंडत्वविरहेपिस्फुवर्ण
त्ववेणुत्वादिजातिसंकीर्णतयासाधारणदंडत्वजातिविरहेन्वसद्भावः ॥ नन्वस्मत्प्रतीसाघन्यथासिद्धि
करंबिततयाघटजनकत्वेन अभिजनकतानसंभवतितत्रचान्यस्मिन्फलाननुगुणत्वविशेषणा राम०
त्वघटंप्रतिअभिजनकत्वेनहेतुसमविरुद्धमितिसाशंक्यफलाननुगुणत्वविशेषणप्रतिक्षेपायप्रतिबंदिंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्शयति किं चेति एवं फलानुगुणा कार्यजनकत्वेनानन्यथासिद्धत्वे कार्यतं घटादिकं तत्तत्सदार्थकारणा
नां दंडचक्रकुलालादेः कारणतां तत्जनकत्वेनदृष्टसाधनताज्ञानादिजनकत्वेन हेतुत्वेप्रसक्तत्वेनै
वेष्टसाधनताज्ञानत्वादिनैवं लाघवाच्चेति न तु तज्जनकत्वेन गुरुतयान्यथासिद्धिनिरूपकत्वादिति शेषः
प्रकृते दंडघटयोर्हेतुहेतुमद्भावस्थले मनसोऽनुमितिकरणतां व्यवस्थापयिष्यन्मूलोक्तव्याप्तेस्तद्घ
टकपदार्थानां च विधेयोऽनुमितिकरणत्वं निराकरोति यद्यपीत्यादिना तत्तद्घटत्वादिजनकतावच्छेदक
तत्तद्घटत्वादिना व्यापकसामान्यधर्मेणासामान्यधर्मावच्छिन्नतत्तद्घटत्वादिहेतुत्वात्तदवच्छिन्नत्व
द्व्यं फलतः कार्यताविशेषणं तस्याप्तिस्वव्यापकत्वादवच्छेदकांतरेति न च व्याप्तित्वेन कारणतायां वि
शिष्टपक्षकसाधारणधूमनिष्ठतादृशव्याप्तिज्ञानाव्यवहितोत्तरत्वस्यानुमितित्वं परामर्शकारणतायां
तु तत्पक्षकतत्साध्यकतत्परामर्शाव्यवहितोत्तरानुमितित्वं कार्यतावच्छेदकमिति के धर्मेकत्वं कार्यतावच्छे
दकावच्छिन्नं प्रतितद्योर्जनकत्वमिति वाच्यं धूमनिष्ठव्याप्तिज्ञानस्य पर्वतपक्षकानुमितिं प्रत्येव नियत
व्यापाराभावेनाकारणत्वात् । न च धूमव्याप्तिज्ञानाव्यवहितोत्तरत्वसपक्षकतदनुमितित्वं तथास्तु तथापि
भ नैकमुपजन्यतावच्छेदकमिति वाच्यं वह्निव्याप्यो धूमो वह्निव्याप्यालोकवान् पर्वत इति समूहालंबनजन्या परामर्श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा०लिंगक०
६१

नुमितौ धूमव्याप्तिज्ञानकरणिकायां व्यभिचारात् व्यापारसंबंधेन तदभावात् तस्माद्धूमपरामर्शोव्य बं
वह्नितोत्तरपर्वतपक्षकवन्ह्यनुमितित्वं परामर्शस्यैव। तस्यापि जन्यतावच्छेदकवाच्यं तथा सतीदमि
ति भावः। ननु जनकतावच्छेदकांतरव्यापकस्यापि नियतपूर्ववर्त्तितावच्छेदकत्वात्कथं तस्य जनक
तावच्छेदकत्वमिति सत आह दर्शयिष्यते हीति तथा च व्यापकरूपेणान्यथासिद्धित्वमिति तथा चान्यथा
सिद्धिनिरूपकत्वान्नतस्य नेत्याशयमिति भावः व्यापकरूपेणान्यथासिद्धित्वे युक्तिमाह अनन्यथेति निस
स्य स्वरूपयोग्यस्य फलावश्यंभावनियमपक्ष्यमवलंब्याह जन्यत्वविशेषितेनेति तादृशानियमाने
व्या भ्युपगमपक्षमवल[illegible]ह भ्युपेत्यैवेति हेतुत्वप्रसंगादिति नियतपूर्ववर्त्तितायामनन्यथासिद्धत्वं तरवि
रहस्य च तत्तद्रूपावच्छिन्नेष्वपि सत्वादिति भावः विशिष्टाविशिष्टेति विशिष्टपदार्थोऽज्ञावत्व[illegible]विशिष्टा
दिः अविशिष्टपदार्थोऽभावत्वादिं परामर्शजनकज्ञानस्य व्याप्त्यादिज्ञानस्य तथात्वं करणत्वं चिकी
र्षां प्रत्यपीति तत्रापि करणांतरासंभवादित्याशयः चिकीर्षायां कारणांतरमाशंकते तत्रेति इहापि
अनुमितावपि तदेवास्तु मन एव करणमस्त्विशंकते मनोऽसाधरणेति चाक्षुषादेरपीन्द्रियत्वेन मनः रामः
करणकत्वात्तद्वारणायसाधारणपदं मनोऽसाधरणकरणकत्वं च मनस्त्वावच्छिन्नकरणकत्वं ज्ञान
९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वनिवेशाच्चिकीर्षासुखादिव्यावृत्तिः अप्रयोजकत्वान्नित्यप्रमाण्यकमानसत्वव्याप्तिकसत्वान्न किंचिद्
तिमानसत्वस्य जातित्वेनाजन्यत्वादिति भावः करणभेदएव कार्यवैचित्र्यमितिनियमाभिमानेन शंकते
करणभेदइति कार्यवैचित्र्यं अनुमितिमानसत्वचिकीर्षादिवैजात्यं सामग्रीभेदएव कार्यवैजात्यप्रयो
जको न तु करणभेदमात्रमिति समाधत्ते सामग्रीति एतदेव दृष्टांतेन दृढयति यथेति पाकजानां रूपर
सादीनां करणभेदेपि सामग्रीवैजात्यात् कार्यवैचित्र्यमित्यनुषंगेनान्वयः तर्हि मनसोऽनुमितिकरण
त्वे कथं प्रमाणविभागः प्रत्यक्षप्रमाणतः पार्थक्येनानुमानस्य परिगणनं मनसइंद्रियत्वेन प्रत्यक्षएवां
तर्भावादिति भावः करणविशेषकेति करणताभेदकेत्यर्थः एतच्च क्रियावैजात्ये विशेषणं क्रियावैजात्या
त् प्रत्यक्षप्रमितितोऽनुमितिवैजात्यात् करणताभेदस्यैव प्रमाणपार्थक्यप्रयोजकत्वादिति भावः अथवा क
रणविशेषकेति करणविशेषणीभूतायाः क्रियायाः पार्थक्यादित्यर्थः तथा च क्रियारूपविशेषणभेदेनैव
विशिष्टभेदव्यपदेश इति भावः अनुमितिमात्रं प्रति अनुमितित्वावच्छिन्नं प्रति व्याप्तिज्ञानादिति कारणाननुगमे
न व्यभिचारादिति शेषः अभावज्ञानत्वेनेति अभावत्वज्ञानत्वेनेत्यर्थः तेन व्याप्तिशरीरे सर्वत्राभावत्वेन पदा
भान र्थांतरस्थलेपि नानुमित्यनु[redacted]पपत्तिः न वा धर्मिनिवेशाधिक्यादेर्गौरवं विशेषसामग्र्या अतिप्रसंगवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰दा॰लिं॰ग॰ रणस्याकस्यकत्वे विषयनिवेशोपि फलमित्याशयेनाह ज्ञानत्वेनवेति ननु पक्षज्ञानत्वस्य पक्षताघटितत्वान्नदूषरी
९२ रेच साध्यादिविशेषांतर्भावात् कथमनुगम इत्यत आह पक्षोपि चेति प्रकृते पक्षपदार्थेपीत्यर्थः धर्मिमात्र
मिति तथा च पक्षतानंतर्भावान्नानुगम इति भावः न चैवं धर्मितस्य केवलान्वयित्वे न तथा धर्मिविषयकत्व
मव्यावर्तकं तथा कारणतावच्छेदककोटौ निवेशानर्ह इति वाच्यं एतदालेस्यैव कल्प्यांतरानुसरणात् ज्ञा
नत्वादेरनुमितिकारणतावच्छेदकपरामर्शत्वव्यापकत्वेपि न तेन रूपेणान्यथासिद्धिः परामर्शत्वस्या
ननुगतत्वात् तथा विशेषरूपावच्छिन्नं प्रत्येव जनकतावच्छेदकत्वेन तथा ज्ञानत्वाद्यवच्छिन्नजनकतावच्छेदकत्वा
भिमतत्व शुद्धानुमितित्वावच्छिन्नजनकतानवच्छेदकत्वात् एतदभिप्रायेणैव परामर्शत्वादेरनुमितित्वसामा
ल न्यजनकतावच्छेदकत्वनिराकरणात् अथ ज्ञानत्वेनानुमितिहेतुत्वे संयोगत्वविभागत्वादिनैव कथं न
हेतुता यावद्विशेषसामग्रीतोऽतिप्रसंगवारणस्यानत्यकत्वात् यावि निगमकस्य दुर्लभत्वादिति चेदगत्याऽवि
निगमनाविरहेण नानाकारणताया उपगमात् अत्र तु विनिगमनाविरहेण नानाकारत्वकल्पनापेक्षया
परामर्शत्वाख्यजातिविशेषं कल्पयित्वा तेनैव रूपेणानुमितिहेतुत्वकल्पनं युक्तं तेनैव रूपेण हेतुत्वे च न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि
षा

विंमेशे नाविरहावकाशः कारणतावच्छेदकतयैव तत्सिद्धेः न च तादृशजातेश्चाक्षुषत्वादि
नासंकरप्रसंगः मानसज्ञान एव तदभ्युपगमात् चाक्षुषादि परामर्शस्थलेपि तदुप
नीततत्तत्सदार्थविषयकमानसपरामर्शकल्पनया क्षणैक व्याजे नानुमित्युप
पादनसंभवात् पक्षादिनासमं चक्षुरादिसन्निकर्षसत्वेपि चक्षुर्मनोयोगाघभा
वस्य फलबलेन कल्पनाच्चाक्षुषादिसामग्रीविगमोपपत्तेः। चाक्षुषादिपरामर्शा
नंतरं तज्जन्यसंस्काराधीनस्मरणात्मकपरामर्शकल्पने नानुमित्युपपादनसंभ
वेन स्मृतित्वव्याप्यैव कथं न जातिरिति तु न वाच्यं लाघवाभावेऽधिके कल्पना वि
रहेबस्यान्याय्यत्वात् अनुमितिपूर्वं स्मृतिकल्पने उभयबाधासिद्धतत्स्थले यत्स्मृ
तिसामग्र्याः उभयबाधसिद्ध्योः मानसं प्रति प्रतिबंधकत्वकल्पनापि विस्यन गौ
रवात् तद्बोधकानुगमेन स्मृतिसामग्र्या अनुगमे नगमात् उपसिद्धिस्मृतिसामग्रीस्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 लीयप्रतिबंधकतायाअनिर्वाहात् न च परामर्शत्वस्य स्मृतित्वव्याप्यत्वे विशेषकारणतायाम
 पितज्जातेरवच्छेदकघटकतया तत्र संशयान्यत्वानिवेशेन लाघवं संशयरूपस्मृतेरभावेन तद
निवेशेऽप्यतिप्रसंगविरहादिति वाच्यं । परामर्शत्वस्य मानसत्वव्याप्यतामतेऽपि संशये तदनुभ
पगमादेव ततोऽनुमितिप्रसंगनिरासात् मतेऽपि विशेषकारणतावच्छेदकगर्भे संशयभिन्नत
त्या न्यांनिवेशादिति तत्राज्ञानाद् इय संयोगादावप्यनुमितिजनकतावच्छेदकतयाजातिविशेष
कल्पनासंभवेन विनिगमनाविरहानुसारात् परामर्शत्वावच्छिन्नस्य व्यापाराविरहेणाक
रणत्वासंभवात् ज्ञानत्वेन करणताया आवश्यकत्वाच्च । अत एव विभागत्वाभ्युपगमादा
यविनिगमनाविरहस्यापि नावकाशः विभागादीनां परामर्शाजनकतया करणत्वासंभ ण
वात् एतेन विशेषकारणकार्यतावच्छेदकेऽनुमितित्वानिवेशस्यावश्यकतया तत एव तद
क वच्छिन्नोत्पत्त्यौपयिकस्मृतेरावारणादनुमितित्वावच्छिन्नं प्रति सामान्यतो ज्ञानत्वेन हेतुत्वं नि
र्युक्तिकमित्यपि परास्तं । विशेषकारणस्य परामर्शादेरनुमित्यकरणतया ज्ञानत्वेन त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ःकरणताकल्पनस्यावश्यकत्वादिति। उक्तं पक्षत्वेन विशिष्य पक्षतावच्छेदकमनिवेश्य वह्न्याद्यनुमि
तिं प्रति वह्निव्याप्यवत्तानिश्चयत्वेन किंचिद्धर्मावच्छिन्नविशेष्यकतानिश्चयत्वेन वा सामान्यतो हे
तुत्वं कस्यचिदभिमतं दूषयति। तत्तत्पक्षतावच्छेदकेति। तर्हि केन रूपेण वह्न्यनुमितित्वाद्यव
च्छिन्नहेतुतेत्याकांक्षायामाह। किंत्विति। विशेषसामग्र्या अतिप्रसंगवारणस्यावश्यकत्वे व्या
प्तिविषयकत्वनिवेशनमफलमित्याशयेनाह वस्तुतस्त्विति वह्निज्ञानत्वेनैवेति। ज्ञानत्वमात्रे
णैव न कथं हेतुतोपेयत इति वुनवाच्यं। सामान्यविशेषयोरेकरूपावच्छिन्नजन्यतावच्छेदकत्वाभावनिय
मात् वह्न्यभावानुमितिं प्रत्यपि वह्निज्ञानत्वेनैव हेतुत्वस्यानुषंगेनावेयः तत्पूर्वं वह्न्यभा
वज्ञानस्यावश्यकत्वे वह्निज्ञानस्यापि तथात्वादिति भावः। अयं चाभ्युपगमवादः। तत्तत्पक्षताव
च्छेदकावच्छिन्नवह्न्याद्यनुमितित्वरूपविशेषकार्यकारणतावच्छेदकगर्भे वह्न्यनुमितित्वादि
निवेशादेवोपपत्तेस्तदवच्छिन्नं प्रति हेत्वंतरस्य निर्युक्तिकत्वात् सुखादिसाधारणजन्यास
विशेषगुणत्वावच्छिन्नं प्रति मनस्त्वेन करणताकल्पनात्तत्रैवानुमितेः सकरणकत्वनिर्वाह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० लिंगक० ९४

अनुमितित्वावच्छिन्नं प्रति ज्ञानत्वादिना हेतुमपि निर्मुक्तिकमित्यस्वमबीजमत्रबोध्यं॥ ॥ समाप्तेयं दीधिति त्व
लिंगपरामर्शटीका॥ ॐ नमो गणेशाय॥ अनुमानं विभज्य केवलग्रंथे केवलान्वयिपदस्य प्रसिद्धार्थपरत्वे ज्ञा
नकारणतापक्षे ज्ञानस्य केवलान्वयित्वासंभवादसंगतिः लिंगकरणतापक्षेपि केवलान्वयिसाध्यकव्य
लक्षणोव्यतिरेकि तिरेकिहेतोरसंग्रहः अन्वयपदार्थव्यतिरेकिपदस्य यथाश्रुतार्थकतया गृहीतसाध्यसहचारव्यतिरेकप्रति
योगित्वमेवान्वयव्यतिरेकित्वमस्तु तथा चोक्तहेतुरन्वयव्यतिरेकिण्येवांतरभवतु नत्वेवमसद्विपक्षकेव
= लान्वयीति मूलोक्तलक्षणविरोधः विपक्षपदस्य साध्याभाववदर्थकतया प्रसिद्धेन साध्ये केवलान्व =
ते यित्वस्यैवालाभादिति वाच्यं तथाहि केवलान्वयिनो अभिधेयत्वस्य न विपक्षतेति लक्षणसंगमात् इ
विपक्षपदस्य साध्याभाववदर्थकत्वे अभिधेयत्वस्यात्यन्ताभावेन तस्याभाववन्मात्रार्थकतया आवश्यक विपक्षपदस्य
त्वात् लक्षणस्य तत्सदंशस्यापि तदर्थकतौचित्यात् न च साध्यस्य केवलान्वयिताया केवलान्वय्यनुमाना
तर्भावे तत्र साध्यसंदेहरूपपक्षतायाः साध्याकाराप्रसिद्ध्या असंभवादनुमित्यनिर्वाहशंकया
प्रामाण्य असंगतिरिति वाच्यं हेतोः केवलान्वयित्वे साध्यस्यापि तथात्वमावश्यके अन्यथा सद्धेतुता गद०
सा निर्वाहादिति तदाशंकासंगतिरिति चेन्न केवलान्वयिसाध्यकव्यतिरेकिहेतोरन्वयव्यतिरेकित्वे तादृशस ९४
द्धेतुकानुमानस्य निर्मासकेरप्युपगंतव्यतया तेषां साध्याभाववद्वृत्तित्वस्य व्याप्तित्वाभ्युपगमविरोधा

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्तिज्ञानं विनाग्निर्गंधत्वानुमित्यनुपपादिति अयं भावः निरुक्तनिश्चयत्वस्यावच्छेदकत्वं न स्वरूपसंबंधविशेषः
व्याप्तित्वेन पक्षधर्मतावगाहिनिश्चयस्याप्यनुमितिजनकतया तदसंग्राहकस्य व्याप्तिविशिष्टवत्तानिश्च
यत्वस्य तादृशावच्छेदकत्वासंभवात् किंत्वनतिरिक्तवृत्तित्वं एवं च निर्गंधत्वव्याप्यवत्त्वावगाहिज्ञानसाधारण
स्य दर्शितहेतुतावच्छेदकविशिष्टवत्तानिश्चयत्वस्य निर्गंधत्वानुमितिजनकतातिरिक्तवृत्तित्वात् तत्र न
निरुक्तव्याप्तित्वमिति यद्यपि धूमत्वाद्यवच्छिन्नवत्तानिश्चयत्वस्य स्वरूपसंबंधरूपावच्छेदकताश्रयत्वमादा
य धूमत्वाद्यवच्छिन्नहेतुकान्वयिन्यपि लक्षणानुपपत्तेः व्यतिरेकव्याप्त्यवच्छिन्नहेतुकान्वयिपर्यंतानुस
त रणमनुचितं तथापि किंचिद्व्यापकताघटितत्वरूपं अन्वयव्यतिरेकव्याप्त्यन्यतरत्वरूपं वा व्याप्तित्वं यदि जन
कज्ञानविषये निवेश्यते तदा धूमत्वादौ तद्विरहे पानतद्वच्छिन्नहेतुकेऽनुपपत्तिरिति व्यतिरेकव्याप्त्यवच्छि
न्नहेतुकस्थले दर्शितरीत्याऽनुपपत्त्युद्धारः इदमुपलक्षणं प्रकृते तत्साध्यीयव्यतिरेकव्याप्त्यवच्छिन्नहे
तुके केवलान्वयिन्यव्याप्तिवारणाय वक्ष्यमाणरीत्यापि तत्तद्दोषोद्धारो बोध्यः ननूक्तरीत्या साध्यांतरी
क यव्यतिरेकव्याप्तिहेतुतावच्छेदकके केवलान्वयिन्यव्याप्तिपरिहारेऽपि वह्निमान् वह्निव्यापकीभूताभा
वप्रतियोगिनः इत्यादौ केवलान्वयिन्यव्याप्तिदुर्वारैव तत्र हेतुतावच्छेदकरूपाया व्यतिरेकव्याप्तेरप्रसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा०केव०
१०७

तत्साध्यकानुमितिसौपाधिकत्वात् तद्विशिष्टवत्ताज्ञानसत्त्वे व्याप्यंतरबोधं विनापि प्रकृतसाध्यानुमितेः
सत्तेरिसत्त्वात् आह वस्तुत्स्यभावावानिति नतु स्वैवव्यतिरेकव्याप्तिरेव प्रकृतसाध्यकानुमितिसौपाधिकीस्या
नुषज्यते प्रकृतहेतुतावच्छेदकविशिष्टविशेषणतापन्नयद्धर्मविशिष्टवत्ताज्ञानत्वं प्रकृतानुमिति
जनकतावच्छेदकं तत्त्वमनुमितिसौपाधिकत्वं प्रकृते विवक्षणीयमिति भावः अथ दर्शितव्यतिरेकव्याप्ति
रूपहेतुतावच्छेदकविशिष्टविशेषणतापन्नमेयत्वादिविशिष्टवत्तानिश्चयत्वस्यापि प्रकृतानुमितिज
नकतानतिरिक्तवृत्तित्वात् मेयत्वादौ च प्रकृतसाध्यव्याप्तित्वाभावाद्व्याप्तिर्दुर्वारैव अनुमितिप्रयोजकवि
षयताश्रयत्वेन धर्मविशेषणे च व्यतिरेकव्याप्त्यवच्छिन्नान्वयव्याप्तेरप्यनुमितिसौपाधिकत्वं [redacted] दुर्घटं त
दनवगाहिनोपि व्यतिरेकव्याप्ति [redacted] विशिष्टवत्ताज्ञानादनुमितेस्तस्य सा तद्विषयताया अप्यनुमित्य
प्रयोजकत्वादन्वयव्यतिरेकव्याप्त्यन्यतरत्वेन धर्मविशेषणे यत्र व्यतिरेकव्याप्तिरप्रसिद्धा तत्साध्यका
नुमानाव्याप्तिरिति चेन्न निरुक्तव्याप्तिविषयतात्वव्यापकव्यतिरेकव्याप्तिविषयतात्वाभावकत्वस्य विव
क्षणीयत्वात् व्यतिरेकव्याप्तेर्वाच्यत्वादिसाध्यकेऽप्रसिद्धावपि न क्षतिः खंडशः प्रसिद्धानां तत्र घटकप दाम०
दार्थानां विषयताकूटस्य विवक्षणीयत्वात्। वस्तुतस्तु यद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारक १०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निश्चयत्वं अनुमितिकारणतानतिरिक्तवृत्तित्वमेवानुमितिः सोपाधिकव्याप्तित्वं मेयत्वादिकं च न तथा मे
क यत्वाद्यवच्छिन्नवह्निव्यापकाभावप्रतियोगित्वावच्छिन्नप्रकारस्यापि व्याप्त्यंतरानवगाहिनोऽनुमितिजन
कत्वात् यदवच्छिन्नाभावत्वेन व्यापकताव्यतिरेकव्याप्तिशरीरप्रविष्टा तत्प्रकारकनिश्चयस्यानुमितिज
नकत्वात् एवं च तादृशनिश्चयत्वस्य जनकतातिरिक्तवृत्तित्वात् वह्निव्यापकीभूताभावप्रतियोगित्वस
हितस्य जलसादेः यत्र हेतुतावच्छेदकत्वात् तत्र केवलान्वयितायाः एवानुपगमात् अन्वयव्याप्तेस्तदवच्छिन्नां
शेऽभानेऽपि अनुमितावनुपयोगात् निरुक्तहेतुतावच्छेदकासहितव्यापकाभावप्रतियोगित्वप्रकारकनि
श्चयस्यानुमितिजनकत्वमिसाद्वायेनैव वह्निव्यापकाभावप्रतियोगित्वरूपहेतुतावच्छेदकस्याप्यनु
मिः सोपाधिकव्याप्तित्वानिराकरणं न च धूमव्यापकवह्निसमानाधिकरणांशासत्त्वावानित्यादिज्ञानाद
नुमितिवारणाय हेतुतावच्छेदकसहितस्यैव व्यापकसामानाधिकरण्यस्य हेत्वंशे भानमनुमतानुपयुज्य
तां साध्याभावव्यापकाभावप्रतियोगित्वस्य च केवलस्यैव भानमुपयुज्यतामिति वाच्यं तथा सति द्रव्य
त्वाद्यभावव्यापकविशिष्टसत्ताद्यवच्छिन्नाभावप्रतियोगिसत्तादिमत्ताज्ञानाद्गुणादौ द्रव्यत्वाद्यनुमा
नापत्तिः हेतुतावच्छेदकस्य व्याप्तिधर्मितावच्छेदकतया भानं यदि नोपयुज्यते तदा नोपयुज्यतामिति एतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰दा॰ केव॰ १०८ केषांचिद्व्यतिरेकव्याप्तिरनुमितिसौपाधिकी न तु सैनान्वयव्याप्तिरेवमेवकारोऽप्यपार्थ एवं च तत्र केवलान्वयि
ता नाभ्युपेयत एव । अन्वयव्याप्तिज्ञानस्य किंचित्करत्वादित्यलक्ष्य[illegible]यानाव्याप्तिरिति व्याकारोऽव्याकार
एव एतन्मते तूक्तानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुकेवलान्वय्यनुमानत्ववत्तद्वच्छि क
न्नहेतुकव्यतिरेक्यनुमानत्वमपि न संभवति तद्रूपावच्छिन्नव्यतिरेकव्याप्तेरग्रहे यातस्य हेतुतानवच्छेदकत्वा
त्तनचतादृशानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नलिंगकव्यतिरेकित्वासंभवेऽपि तद्रूपपुरी
रेय तद्रूपावच्छिन्नाभावत्वावच्छिन्नव्यापकत्वं निविष्टं तद्रूपावच्छिन्नहेतुकव्यतिरेकित्वमव्याहतमिति तदेवो
पगंतव्यमिति वाच्यं तथा सति ग्रंथकृतो वह्निव्यापकाभावप्रतियोगिमत्त्वादिहेतुनिर्देशासंगतेरिति चिंत
नीयं । सांप्रदायिकास्तु जलं निर्गंधमित्यादिकं प्रकृतसाध्यकेऽसत्यव्यावृत्तिप्रदर्शनपरं वह्न्यभाववानि
त्यादिकं तु प्रकृतहेतुके सत्यव्यावृत्तिप्रदर्शनपरमिति वदंति तदसत् जलं निर्गंधमित्यादौ हेतुतावच्छे
दकीभूतपृथिवीत्वाभाववानुमितिसौपाधिकव्याप्तेर्वह्न्यभाववत्साध्यकेहेतुतावच्छेदकीभूतवह्निव्यापकाभाव
क प्रतियोगित्वरूपव्याप्तेरिव प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुव्याप्त्यभावादेव वारणे तत्र प्रकृतसाध्यकत्व ग॰म॰
निवेशव्यावृत्त्यसंगतेः न च पदवच्छिन्नाभावत्वेन हेत्वभावनिष्ठासाध्याभावव्यापकता यादृशाव्यतिरेकव्याप्तौ १०८

प्रविष्टाभावत्वधर्मावच्छिन्नहेतुकाव्याप्तिः एवं च जलत्वत्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेः पृथिवीत्व
व्यापकाभावप्रतियोगितावच्छिन्नहेतुकत्वविरहेपि पृथिवीत्वव्यापकाभावप्रतियोगितावच्छिन्नाभावत्वावच्छिन्न
व्यापकताघटितव्याप्तेः तादृशाभावप्रतियोगितावच्छिन्नहेतुकतया तादृश्याः पृथिवीत्वव्यापकताघटितव्या
प्तेरेव च प्रकृते विवक्षणान्न प्रकृतहेतुकेसन्नेनतद्व्याप्तिरिति वाच्यं एवं सति पृथिवीत्वव्यापकतावच्छेदकपृथि
वीत्वव्यापकाभावप्रतियोगितावच्छिन्नाभाव[redacted]त्वव्प्रतियोगित्वमेव प्रकृतहेतुतावच्छेदकं अभावप्रतियोगि
तावच्छेदकतया तदन्तर्भूतं पृथिवीत्वव्यापकाभावप्रतियोगित्वं नैतत्स्वरूपं शरीरे स्वात्मभावासंभवादिति पृ स्व
थिवीत्वव्यापकतावच्छेदकजलत्वाद्यवच्छिन्नाभावत्वव्प्रतियोगित्वमेव तथा च तन्निरुक्तप्रकृतहेतुतावच्छेदका
घन्यदेवेति तदवच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितं प्रकृतहेतुतावच्छेदकं ननु प्रकृतहेतुतावच्छेदकावच्छिन्ना
भावत्वावच्छिन्नव्यापकताघटितमिति निष्कर्षे हेतुतावच्छेदकीभूतव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्ति
त्वं तथा च प्रकृतहेतुतावच्छेदकाभेत्तदवच्छिन्नाभावत्वावच्छिन्नव्यापकतायाश्च तद्रूपघटितत्वेन कथंचिदपि तन्नि
वेशासंभवात् प्रकृतहेतुतावच्छेदकरूपव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वं दुर्घटमेव अन्ये तु वस्तुभा
ववान्वह्निव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादिके प्रकृतहेतुकत्वव्यावृत्तिप्रदर्शनपराफक्किकेव प्राथमिकी।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० केव० तदुपरि जलं निर्गन्धं पृथिवीत्वव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादिकं प्रकृतहेतुके सत्यव्याप्तिस्थलं कि
१०९ मर्थमुपेक्षितमित्याकांक्षायां चरमाजलं निर्गन्धमित्यादिपङ्क्तिका जलं निर्गन्धमित्यादौ हेतुतावच्छेदकव्यतिरेक
व्याप्तेः प्रकृतसाध्यकानुमित्यौपयिकत्वाभावादेव वारणे प्रकृते हेतुके सत्यनन्तद्वारणप्रयोजनकत्वमिति तदर्थमि
त्याहुः तदपि न सम्यक् वह्निमान् धूमादित्यादेः केवलान्वय्यनुमानस्यैव तद्घटितत्वादिना धूमादेर्व्यतिरेकितांद
शायां संग्रहाय प्रकृतहेतुकेत्यस्यावश्योपादेयतया तद्घटितस्थलान्तरानुसरणानौचित्यात् ॥ व्यतिरेकेणा
प्तिरनुमित्यौपयिका न तु सैव अन्वयव्याप्तिरेवं एवकारोऽप्यर्थे एवं च तत्र केवलान्वयित्वेनाभ्युपेयत एव अन्व
यव्याप्तिज्ञानस्याकिंचित्करत्वादित्यलक्षतयानाव्याप्तिरिति भावः प्रतिग्रहीतव्याप्तिर्नेदाऽऽदे प्राचीनसंवादमा
ह। अत एवेति यल्लिंगकानुमितौ यद्रूपावच्छिन्नलिंगविषयता न प्रकृतसाध्यानुमितिहेतुर्न प्रकृतसाध्यानुमितिज
नकतावच्छेदिका तथा चेतरव्यापकाभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिंगविषयतासामान्यं
अभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिंगविषयतासामान्यं वा तत्कालीनतत्स्वरूपीयप्रकृतसाध्या गदा०
नुमितिजनकतावच्छेदकत्वशून्यत्वं तद्रूपावच्छिन्नतत्कालीनतत्स्वरूपीयप्रकृतसाध्यककेवलान्वय्यनुमानमिति समुदायार्थः १०९
यद्यप्यत्र साध्याभावातिरिक्तकिंचिद्व्यापकाभावप्रतियोगित्वस्यान्वय[redacted]प्तेर्बहिर्भावेऽपि विषयालिंगतावच्छेदकावच्छिन्न
व्या

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यैकस्यैव समूहालंबनवैलक्षण्येन ज्ञानं तत्र केवलान्वयिन्यव्याप्तिः तत्र तादृशाभावप्रतियोगित्वप्रकारतानि
रूपिताया एव विशेष्यताया अन्वयव्याप्तिप्रकारतानिरूपिततया प्रकृतानुमित्यौपयिकत्वात् केवलान्वयिसाध्यके
साध्याभावाप्रसिद्ध्या प्रकृतसाध्याभावव्यापकीभूताभावप्रतियोगित्वप्रकारतापर्यंतनिवेशासंभवात् तथापि
तादृशाप्रतियोगित्वप्रकारतानिरूपितलिंगविषयतास्थले लिंगविषयतानिरूपितत्वादृशाप्रतियोगित्वप्रकारता
याएव विवक्षणान्न दोषः एवं चाभावप्रतियोगित्वप्रकारतामात्रनिवेशे नानुपपत्तेः अभावविशेषणव्यापकताप्र
वेशानमनर्थकमिति साध्ये न अभावप्रतियोगित्वेन वैस्तः साध्यसामानाधिकरण्यरूपाया अन्वयव्याप्तेरपि सा
ध्यसंबंधितिष्ठसंबंधप्रतियोगित्वरूपतया असत्त्वप्रसक्तो भावोपादानं केवलान्वयिप्रमेयत्वादिहेतुकस्थले चाभा
वप्रतियोगित्वे न लिंगतावच्छेदकावच्छिन्नविषयताभ्रमए व प्रसिद्धेति नाव्याप्तिरिति सर्वत्र भ्रमस्याप्रामाणिकतया
स्वयमन्यथा केवलान्वयित्वनिरूक्तमिति बोध्यं एवं केवलव्यतिरेकित्वादिकमिति यथामतं अन्वयसहचाराच्चयव्या
प्तिस्थाने व्यतिरेकसहचारव्यतिरेकव्याप्तिं निवेश्य केवलव्यतिरेकित्वं अन्वयसहचारमन्वयव्याप्तिं निवेश्य अन्वयव्य
तिरेकित्वं निर्वाच्यमिति संक्षेपः केवलान्वयिनोऽभिधेयत्वस्य न विपक्षस्तत्संभिधेयत्वसाध्यककेवलान्वय्यनुमानल
क्षणसंगमनपरे मूलग्रंथे अभिधेयत्वं यदि शब्दबोध्यत्वरूपं विवक्षितं तदा यथा काशाकाशब्दाद्बोधाश्रयत्वमनभि
धेयमप्युपतिष्ठते इत्यग्रिमग्रंथविरोधः प्राचीनमते शब्दाश्रयत्वस्याकाशपदाशक्यत्वेपि शब्दबोध्यत्वरूपाभिधेयत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० केव० ११० स

विवादादन्यथा शाब्दानुपतिष्ठत इत्यस्यैव व्याघातादिस्तथोऽभिधेयत्वं व्याचष्टे अभिधेयत्वमिति अनभिधाने अ-
भिधेयत्वशून्यत्वार्थके अभिधेयत्वशून्यत्वरूपाभिधेयत्वविपक्षताविरहप्रसंजकत्वरूपं तद्व्याघातकत्वं न संभ-
वतीति व्याघातपदमन्यथा व्याचष्टे विपक्षत्वेति विपक्षत्वासिद्धिरिति विपक्षादिपदेन विपक्षतयाभिमतस्या-
नभिधाने तत्र शब्दप्रमाणाप्रवृत्तेस्तद्वृत्तौ च न्यायसाध्यपदार्थानुमानस्यानवकाशात् परं प्रति तस्य विप-
क्षत्वसिद्धेरसंभव इति भावः मूले नभिधेयमिति तच्छब्दानभिधेयमित्यर्थः उपतिष्ठत इति संबंधितस्य तोपका-
रां शेसंबंधग्रहस्यानपेक्षतया शाब्दाश्रयत्वस्य शाब्दत्वेपि तत्प्रकारेणाधर्मिणि शाब्दिकग्रहादेव तत्प्रकारेण धर्मि-
णोस्मरणस्य तद्धर्मीयबोध्यत्वसाधनादिव्यावर्तकानतिप्रसक्तत्वरूपशक्यावच्छेदकत्वग्रहादेव च तत्प्रकारकशाब्द-
बोधस्य च संभवादिति भावः एतद्योपलक्षणं लक्षणायाः नभिधेयस्योपस्थितावपि दृष्टांतत्वसंभवात् शाब्दान-
भिधेयस्य विपक्षस्योपस्थितावपि तत्र विपक्षत्वेमानाभावः शाब्दस्य परं प्रत्यासिद्धेतत्वासिद्धेः अनुमानं च साध्याप्र-
प्रसिद्ध्या न संभवतीत्याशंक्य अभिधेयत्वविपक्षसिद्धिपर्यवसायिसाध्याप्रसिद्ध्याघनास्कंदितमभिधेयत्वप-
क्षकमनुमानमाह एवं चेति अनभिधेयत्वेपि शाब्दानुपस्थितिसंभवे चेत्यर्थः एतेन विपक्षस्यैकानुमानेपि
सामान्यतः साध्यघटकतया शाब्दात्तदनुपस्थितौ शाब्देन साध्यादिप्रतिपादनासंभवात् परार्थानुसंभवो गम०
निरस्तः प्रकृतानुमानेनैव विपक्षत्वधर्मिपर्यंतसिद्धये धर्मिणामननुगमेपि पतिकुलोपीति इत्यस्यनुमानाक्षिप ११०
मान ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽप्रसिद्धिरिति दोषः अव्याप्तत्वे सर्वैत्रिककत्वे केवलान्वयिव्याप्तत्वरूपस्याव्यभिचारविरहेऽप्येवमत्येपि व्याप्तत्वस्य असंताभा
वप्रतियोगित्वरूपत्वे एवमसंताभावप्रतियोगित्वस्य साध्यादिना व्याप्तत्वस्य साधेः पौनरुक्त्यं अतो व्याप्तत्वं हि मन्यथा व्याच
ष्टापाए व व्याप्तत्वस्य साध्यादिनाप्रदर्शित व्यभिचारमुद्दस्य असंताभावप्रतियोगित्वे व्यभिचारप्रदर्शनपरमेव मिसाध्यादि ग्रंथ
मवतारयति … तेनत्विति अन्योन्याभावेति अन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वमिसाध्याभेनति
रुक्तव्याप्तत्वस्य … सार्थीयः लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे अन्योन्याभावप्रतियो
गितावच्छेदकत्वस्य … व्याप्तत्वसाधकानुमाने कंबुग्रीवादिमत्वाद्यावेवच्छेदर्मत्वहेतौ व्यभिचार इत्यतस्तन्निराकरणाय गुरो
रप्यवच्छेदकत्वमंगीक… तिलच्छिति व्याप्तत्वं यतो व्याप्तत्वं तत्र केवलान्वयित्वनिर्वचनमुक्तव्यभिचारं निरस्यति गगनेति
इति न व्यभिचार इस्तत्र इति नात्र तद्वस्य घटे नतु कंबुग्रीवमेव परामृष्यते प्रथमेसाध्यसत्वाद्गगनादौ चधर्महेतुविरहाव्य
भिचारनिरासो बोध्यः मूले केवलान्वयीति असंताभावप्रतियोगित्वस्यान्योन्याभावप्रतियोगितावच्छेदकत्वरूपव्याप्त
त्वाप्रसक्तिरिति भावः नानेति तथा चैकधर्मिनिष्ठव्याप्तत्वादिकं तद्रूपवद्धर्मान्तराद्व्यावृत्तत्वस्य च न केवलान्वयित्वसं ग
वदस्यतो न व्यभिचार इति भावः तयोरनुगतयोः सिद्धेः ननु अव्याप्यवृत्त्यभावादेः केवलान्वयित्वाकथनात्तन्निराकरणमूले
युक्तं यदि च लक्ष्याप्रसिद्ध्या लक्षणासंगं वं दर्शयितुं यस्य मस्य केवलान्वयित्वं तस्यैव तथात्वं निराकर्तुमयमुद्यमस्तथापि अभा
वप्रतियोगित्वादेस्तथात्वस्य प्रदर्शितत्वात्तदप्रनिराकरणे न न्यूनत्वमतो न त्विति प्रतियोगिहत्वादिकमपि साध्यादिना अन्योन्याभावप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰दा॰के॰वं॰ त्रियोगितावच्छेदकत्वपरिग्रहः अभावाधिकरणादिना अवच्छेदकपरिग्रहः विशेषणतावच्छेदकेति स च धर्माभावत्वादिकं एवं च
१११ उक्तरीत्या स्वतन्त्राभावप्रतियोगित्वादेर्यन्निष्ठाभावप्रतियोगित्वं तस्य च न केवलान्वयित्वमिति भावः एवं च अस्वतन्त्राभावप्र
तियोगित्वादिः केवलान्वयिनि त्वात्संभवो वेत्यर्थः अभ्युपगमाद् ध्वंसप्रागभावयोरसंत्वाभावविरोधित्वाभ्युपगमे तो
क्तिः तादृशाविरोधस्य स्वयमनभ्युपगमात् प्रकारान्तरेणाश्रयनाशाजन्यगुणत्वाश्रयतात्वाभावस्य केवलान्वयित्वं
निराकरोति वस्तुतः इति तुल्ययोगित्वेत्यनेन तन्नीकाभावः केवलान्वयीति पूरणीयं दैशिकः स्वप्रतियोगिसमवायित्वाधि
श्रयोऽबोध्यः आश्रयसत्त्वदशायामुत्पन्नस्य नाशस्य प्रतियोगिसमवायिनीवाश्रयनाशाधीननाशस्य प्रतियोगिस गुणना॰रा
मवायिनोऽधिकरणे प्रत्ययस्यानुत्पत्तिकतया न तद्वर्तमानतेति भावः तादृशाश्रयस्य यो विवादस्तन्न वाक्यसमये चेति का
लिकविशेषणतायाएवसंबन्धतया दैशिकविलक्षणविशेषणतासंबन्धेन तादृशानाशाभावस्य केवलान्वयित्वाक्ष
नि तेराह आकाशाभावतुल्यत्वाच्चेति आकाशाभावस्यावृत्तिप्रतियोगिकत्वेऽपि प्रतियोगिस्वरूपाभावप्रतियोगितया न के
वलान्वयित्वं तथात्वं नाशस्यावृत्तित्वेऽपि तद्भावस्य तदात्मकाभावप्रतियोगित्वान्न केवलान्वयित्वमित्यर्थः प्रतियोगिनो ऽ
भावाभावत्वनियममन्तरेणाकाशस्य प्रतियोगितयास्वाभावाभावत्वव्यवस्थापनं न संभवतीति अभावाभावस्येति
स्वा मूले अभावाभावस्य वैसदृश्यकतया व्यावर्णयति अभावेतिवाच्यत्वादेः किंचिद्विशिष्टस्याभावाभावत्वेऽपि भावत्वस्याभावा रा॰म॰
भावत्वव्याप्यत्वनियुक्तिकमतो भावपदं प्रतियोगिपरतया व्याचष्टे भावत्वादिति प्रतियोगित्वस्य चाभावाभावत्वनियतत्वं नि १११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ अन्योन्यासंसर्गाभावसाधारणो·

ष्ठस्यूहमेव अन्योन्याभावाभावत्वस्यैव प्रतियोगितारूपत्वात् अत्रैवाचार्यसंवादमाह यदाहुरिति ननु ध्वंसप्रागभावयोरसं
सर्गाभावविरोधितामते ध्वंसप्रागभावदशायामपि तदधिकरणेऽसंसर्गाभावविरहसत्त्वात्तस्य च प्रतियोगिरूपत्वासंभ
वात् प्रागभावादेरेवाचतद्रूपतात् तथा चासंसर्गाभावाभावः प्रतियोग्येवेति मूलासंगतिरत आह प्रागभावादेरिति त
दभावत्वस्य तया प्रागभावाद्यभावरूपतया तस्यापि प्रागभावादेरपि प्रतियोगिरूपत्वात् असंसर्गाभावप्रतियोगिता
त्वघटाद्यसाधारणधर्मरूपादिविशेषकंबुग्रीवादिमत्त्वादेर्घटादिभेदाभावत्वविरहात् असाधारणो धर्म इति मूलस्य
यथाश्रुतार्थासंगतेराह प्रतियोगितावच्छेदक इति प्रतियोगितावच्छेदकः संबंध एवान्योन्यासंसर्गाभावसाधारणोऽभा
व इति योजना अन्योन्यासंसर्गाभावयोः साधारणः स च संबंधविधया अवच्छेदकः कचित्तु भेदप्रतियोगितायां केचित्संस
र्गाभावप्रतियोगितायां प्रतियोगिसंबंधवत्ताज्ञानस्याभाववत्ताज्ञानाप्रतिबंधकतया न प्रतियोगिसंबंधस्याभावाभाव
त त्वमिति समाधत्ते यद्वत्वेहीति ज्ञात इत्यंतं न प्रतीयते अवच्छेदकीयेरसा न यान्वयि तथा च तदभावव्याप्यत्वादिना अगृहीतसद
र्गवत्त्वज्ञानं यत्र प्रतीत्यनुत्पादे यदभाववत्ताव्यवहारे वा प्रयोजकमित्यर्थः यदधिकरणे कदापि कस्यापि तदभावभ्रमो न
जातस्तदभावप्रतीतेः प्रतियोगिमत्ताप्रत्ययानुत्पादप्रयोजकत्वविरहात्तस्यैव तदभावात्मकत्वमिति नियमासंभवः अ
तोऽभावव्यवहारस्यापि निवेशः व्यवहारः सामान्यतः सर्वत्रैवं संभवतीति न व्यवहारविषये [illegible]तिप्रसंग इति शंकापि
मिथस्तथात्वे पि तु परस्परप्रतीत्यनुत्पादप्रयोजकत्वं परस्पराभाववत्ताव्यवहारप्रयोजकत्वं वेत्यर्थः तथा च न प्रतियोग्य
भावयोः परस्पराभावत्वानुपपत्तिरिति भावः तत्संबंधवत्त्वं प्रतियोगिसंबंधवत्त्वं तद्विषयः अभावप्रतीत्यनुत्पादादिप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०प्र० केव० योजकधीविषयः ननु प्रतियोगिसंबंधप्रकारकबुद्धिसत्वेपि अभावप्रत्ययानुत्पादस्यानुभविकत्वे स्यत आह क्व
११२ चिच्चेति विशेषदर्शनतया व्यावर्तकधर्मदर्शनतया नस्खलतः व्यावर्तकदर्शनतामपुरस्कृत्य तस्याभावविरोधि
त्वं किंतु तत्संबंधस्यैवेति शेषः तथा च तत्संबंधएव तदभावाभावः विरोधिनएवाभावाभावत्वादिति भावः प्रति
योगितावच्छेदकसंबंधस्य घटसंयोगादेः अभाववत्ति घटाद्यभाववति कर्मादौ संबंधांतरेण कालिकादिना
नतयात्वेन संबंधसामान्येन विरोधित्वं तुल्यमेव प्रतियोगिसाधारणमेव क्वचित्प्रतियोगिनः क्वचित्तत्वाव
च्छेदकस्याभावत्वकल्पनेकल्पनाच्छेद इति कल्पनैवप्रानुबोधात् संबंधस्याभावत्वमित्युक्तं दूषयति अनतिप्र
सक्तरूपे चेति अनतिप्रसक्तरूपे घटसंयोगादेः घटाद्यभावाभावत्ववारणाय अनुगमसत्वे नोपि अनुगमस्यै
कस्य कल्पनासंभवे नापि स्वात्मत्वादिति शेषः तद्वृत्तिगुणाद्यभावप्रतियोगितावच्छेदकसंयोगादिसंसर्गवति
अभावविलयप्रसंगात् अभावसत्वे न तदभावासत्वप्रसंगात् प्रतियोगिनिरूपिततादृशसंबंधएवाभावा
भाव इति यदुच्यते तत्राह अवतामिति अवतां प्रतियोगिरूपाभावानां वै प्रतियोगितया व्यधिकरणसंबंधावच्छि
न्नाभावस्य च केवलान्वयित्वं खंडयतां। तदभावे तिव्यधिकरणसंबंधावच्छिन्नगगनाद्यभावाभावे सर्वेः विलो ग
यप्रसंग इति प्रतियोगिनिरूपिततादृशसंबंधाप्रसिद्धेरिति भावः तादृशगगनाद्यभावस्याभावाप्रतियोगि ग०म०
त्वस्य मतद्वयेप्येवेति अवतामित्युक्तं पूर्वपक्षिणा लक्ष्याप्रसिद्ध्या लक्षणसत्वस्योक्तत्वात् लक्ष्याप्रदर्शनमेवोचितं ११२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्यन्ताभावले

ननु लक्षणाभिधानं लक्षणस्य प्रागेवोक्तत्वादत आह लक्षणमिति गगनाभावादिसाधारणानुमानानां लक्ष्यता
निर्वाहाय लक्ष्यो विशेषणान्तरं प्रक्षिपतीत्यर्थः आकाशादेः स्वाभावाभावत्वस्य निर्युक्तिकतया आकाशाभा
वादिसंग्रहाय अभावे वृत्तिमत्त्वविशेषणदानमयुक्तमित्यालोच्य तन्मूलकतां निरस्यमाह आकाशस्येति घटा
देरिवाकाशस्यापि स्वाभावाभावत्वमविशेषात् स्यादित्याशंक्य तद्विशेषं प्रदर्शयति भावयतीति भावो घटादि
रूपः प्रतियोगितदभावास्वत्वप्रतीत्या तदभावाभाववत्त्वप्रतीत्या इह च वृत्तिस्थले च न तथा न प्रतियोगिमात्रत्रा ता
वाभाववत्त्वप्रत्ययः संभवतीति शेषः प्रतियोगिमत्त्वएवाप्रसिद्धेरिति भावः अधिकरणविनिर्मोकेन च न नञ्
पदोल्लेखी प्रत्ययः संभवति अभावादिपदोल्लेखी संभवन्नपि प्रकृते सिद्ध इति नाधिकरणानुपरक्तगगनाभावा
भावप्रत्ययबलात् गगनस्य तत्त्वमिति शंकावसरः ननु गगनस्य स्वाभावाभावत्वानुपगमे तस्य स्वाभा
वप्रतियोगित्वानुपपत्तिरित्याशंक्याह अभावप्रतियोगित्वं चेति स्वरूपसंबंध एव न तु अभावाभावत्वं अधस्ता
त् व्याप्तिवादे [illegible] ननु प्रतियोगित्वमभावत्वानात्मकमपि लघ्वाप्यलयात् [illegible] ये देवेसत आह [illegible] भावप्रति न
योगित्वं चेति आकाशादेः स्वाभावाभाववत्त्वविरहेपि प्राचीनकेवलान्वयिलक्षणे वृत्तिमत्पदोपादानं संबंधवि
शेषस्य चकत्या समगम्यतीति एवं चेति संबंधविशेषनिवेशप्रयोजनमाह अत एवेति समवायेनेति स्वं
बंधेनाभावप्रतियोगित्वेपि सन्निधानेनान्वयः विषयतयाज्ञानस्य परंपरासंबंधेन स्वसमवायिविषयत्वरूपेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा०केव० ज्ञानत्वस्य स्वरूपसंबंधेन च ज्ञानविषयत्वादेः केवलान्वयित्वं तेषां केवलान्वयिताघटकतत्तत्संबंधावच्छिन्नाभाव
११३ प्रतियोगित्वादिति भावः प्रतियोगितायां केवलान्वयिताघटकसंबंधावच्छिन्नत्वनिवेशाच्च प्रतियोगितावच्छेदक
संबंधेन प्रतियोग्यसामानाधिकरण्यस्य निवेशाभिप्रायेण। तत्र प्रकृतसंबंधनिवेशानेन न प्रतियोगितायां संबंधाव
च्छिन्नत्वं निवेश्यं॥ ॥ ननु प्रतियोग्यसमानाधिकरणत्वं यदि स्वप्रतियोगिसमानाधिकरणो यस्तदन्यत्वं तदा संयोगादे
रपि केवलान्वयितापत्तिः संयोगाभावस्य द्रव्ये प्रतियोगिसमानाधिकरणतया तदन्यत्वाभावात् नापि तदभावनिष्ठं
यत्तदभावप्रतियोगिसामानाधिकरण्यं तदसत्ताभाववत्त्वं तत्सामानाधिकरण्यस्याव्याप्यवृत्तित्वानुपगमे तद्दोषस्यै
वदुर्वारत्वात् किं तु स्वप्रतियोग्यनधिकरणवृत्तित्वमेव एवं च तद्धि शेषणाकस्याभावस्यैव स्वपदार्थतया गगनाभावप्र
तियोग्यधिकरणाप्रसिद्ध्या न तदभावस्य तथात्वमिति तथाविधाभाववत्त्वं तत्प्रतियोगित्वमादाय गगनादेः केवलान्वयि
त्वापत्तिरलब्धाहाः। आकाशेति। अघटत्वात्। व्याप्तिवादे केवलान्वयितावच्छेदकसंबंधसामान्ये यदभावप्रतियोगिप्रतियो
गिकत्व किंचिदधिकरणानुयोगिकत्वोभयं तदभावस्तत्वं यत्किंचिदधिकरणावृत्तित्वानवच्छेदकावच्छिन्नप्रतियोगिताकत्वम्
पप्रतियोगिवैयधिकरण्यं वा विवक्षणीयं तस्याकाशाभावसाधारणमिति भावः मूलेनोपात्तवृत्तिमत्त्वस्य प्रतियोगित्व
विशेषणतये गगनादिवारणे उक्तयाभावघटितप्रतियोगिवैयधिकरण्यप्रवेशे गौरवादयुक्तेः स्वाश्रयेनाहवृत्तिमत दाम०
इति वृत्तिमत्त्वं प्रकृतसंबंधेन बोध्यं तेन संयोगादिना गुणादेर्न केवलान्वयिता आह वृत्ताभावेति प्रतियोग्यनधिकरणवृत्त्यभावे सप्तम्यर्थः ११३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावा यादृशप्रतियोगिताश्रयानधिकरणं किंचिद्वृत्तिमत्त्विष्टं लघुत्वमिति फलितार्थः अतो जगत एव किंचिद्देशकालादि
वृत्तित्वविशिष्टतदभावात्मकप्रतियोगिमत्तयास्वरूपसंबंधस्य केवलान्वयिताघटकत्वस्थले प्रतियोगिवैयधिकरण्याऽ
सिद्धिरिति दोषानवकाशः प्रकारांतरेणासंयोगाद्यभावस्य केवलान्वयित्वमुपपादयन्नाकाशादिकं च वारयतो वृत्तिमत्पद
मपि सार्थकं कुर्वतोऽन्यस्य मतमाह व्याप्यवृत्तिसार्थकमिति अभावविशेषणा अभावविशेषणबोधकं व्याप्यवृत्तित्वं चेदं यद्यव
च्छिन्नवृत्तिकान्यत्वं तदा संयोगाद्यभावस्य तथात्वात् संयोगादावतिप्रसंगः यद्यनवच्छिन्नवृत्तिकत्वं तथा कालिकसंबंधावच्छिन्न ८
प्रतियोगिताकघटत्वाद्यभावस्य तद्वृत्तिकालेऽपि तदनधिकरणदेशावच्छेदेन वर्त्तमानतया केवलान्वयिनोऽसंग्रहप्रसंगः तदभा
वस्य घटत्वादेः समवायेन व्याप्यवृत्तित्वात् येन संबंधेनाभाववत्तासामान्यं यत्प्रतियोगिमात्राऽसामानविरोधी तेन संबंधेन व्याप्य
वृत्त्यभावीयत्वं प्रतियोग्यन्यत्वनिवेशे च गौरवमिति सत्त्वरसः ननु तादात्म्यसंबंधेन प्रतियोग्यधिकरणतया वृत्तिमत्त्वस्य चा
प्रसिद्ध्या तेन संबंधेनाभिधेयत्वाद्यवच्छिन्नस्य केवलान्वयित्वानुपपत्तिरत आह तादात्म्येनेति अभिधेयस्य अभिधेयत्वाव भि
च्छिन्नस्य व्याप्तिवदिति यथा व्याप्तिशरीरे अधिकरणत्वादिस्थले संबंधत्वमन्तर्निवेशितं तथाऽत्रापि तन्निवेशनीयमिति सर्थः
ननु प्रमाजातीयविषयत्वरूपत्वेऽपि प्रमेयत्वस्य केवलान्वयित्वानुपपत्तिर्दुर्वारैव अनुगतधर्मस्याभावप्रतियोगितानवच्छेदक
त्वेऽपि तदवच्छिन्नव्यक्तीनां विशेषरूपेणाभावप्रतियोगित्वाक्षतेरतोऽनवच्छेदकत्वघटिततया तल्लक्षणं परिष्कार्यमिति मूला
शयं प्रकाशयति तथा चेति अनवच्छेदकं यद्रूपं तद्वत्त्वेन रूपेण केवलान्वयीति विवक्षणीयं तेन घटादेर्न घटत्वादिना केवला
न्वयित्वं किंतु प्रमेयत्वादिनेवेति नियमोपपत्तिः इष्टं चाप्रतियोगित्वस्थले प्रतियोगितानवच्छेदकत्वनिवेशनेनेति चाप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तियोगित्वघटितलक्षणेऽव्यगुणाभेदयोः प्रतियोगिव्यधिकरणाऽत्यन्तभेदत्वाद्यवच्छिन्नाभावप्रतियोगित्वेन केवलान्वयि
त्वापत्तिविरहात् प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यपर्यन्तनिवेशावश्यकत्वमिति स्पष्टं च संगतिः द्विता
दिना न केवलान्वयित्वमिति तदन्यत्वाद्यवच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि तदवच्छिन्नासामानाधिक
रण्येन लक्षणाघटकत्वादिति भावः अन्यतरत्वेन केवलान्वयित्वस्येष्टत्वाद्वित्वादिनेत्युक्तं आदिना धर्मान्तरस्यापार
पादित्वादिपरिग्रहः इदमुपलक्षणं गगनाभावादेर्घटत्वादिविशिष्टत्वेन न केवलान्वयित्वमित्यपि द्रष्टव्यं तादृशाधर्मा
वच्छिन्नस्य प्रतियोगितानवच्छेदकधर्मावच्छिन्नस्य अधिकरणावृत्तितायाः अधिकरणसंबंधतया विवक्षितत्वादिति
तथा च तादृशाभावप्रतियोगितानवच्छेदकयत्किंचिदधिकरणनिष्ठकेवलान्वयिता घटकसंबंधप्रतियोगितावच्छेदकं
यद्रूपं तद्रूपवत्त्वं तेन रूपेण केवलान्वयित्वमिति लक्षणाकरणीयमिति भावः तादृशोऽन्वयेति विरुद्धोऽन्वयेत्यर्थः तस्मात्तथा
त्वात् विरुद्धयोरन्यतरस्य संबंधप्रतियोगितानवच्छेदकत्वात् सिद्ध्यभावपक्षतामते साध्यसंदेहस्यानपेक्षणात् तथापि
साक्षेपासंगतेराह संदिग्धेति मूले न प्रमेयपक्षकः प्रमेयधर्मिकः तर्हि किंधर्मिकस्तत्राकांक्षायामाह किंचिदिति अतो
ऽत्र न विषयकः प्रकृतानुमितिविषयताविलक्षणविषयतावान् तथा चाविलक्षणविषयताशालिसाध्यसंदेहस्यैवानु
मितिहेतुतया सोऽनुपयुक्त इत्यभिमानः प्रमेयत्वसाध्यकानुमानासंभवेऽपि प्रमेयत्वपक्षकास्तित्वानुमानमेव केवलान्व
य्यनुमानं निष्प्रत्यूहमिति शंकां निरस्यति प्रमेयत्वपक्षकेति अस्तित्वस्य परार्थसाधर्म्यरूपस्य केवलान्वयितया तत्साध्य
कानुमानस्यान्वयव्यतिरेकि साध्यभिधानेन घटत्वस्य तत आह दीधितौ अस्तित्वेति घटास्तित्वं घटवृत्तित्वं केवलान्वयिनोऽस्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता त्वस्य यत्र साध्यैतत्र संशयानुपपत्त्या अनुमितिसत्त्वनिर्वाहः तादवस्थ्यादिति भावः विषयतावैलक्षण्ये विषयतावैलक्षण्य
मिसाशये न शंकते मूले अथेति समानविषयकत्वेनेति तथा चैकस्यानुमितिसविलक्षणाविषयताकत्वे अन्यस्या
पि तथात्वमावश्यकमिति प्रमेयत्वधर्मिकसंशयादपि तत्साध्यकानुमितिर्निष्प्रत्यूहैवेति भावः अर्थान्तरेदात्त विष
यतावैलक्षण्यात् ग्राह्यसंदेहस्याप्रतिबंधकतयाविरोधिपदं प्रतिबध्यपरतया व्याचष्टे दीधितौ साध्यसिद्धीति
साध्यं पक्षनिष्ठात्वेव प्रतियोगिनैव समसमानविशेष्यकसंशयः कथं साध्यवत्त्वानिश्चयप्रतिबंध्य इत्याशं
क्याह विशेष्येति विरोधिविषयतामात्रेणेति याद्यविरोधि धर्मप्रकारकत्वधर्मिसंबंधविषयतामात्रपुरस्कारेण
तु अन्वयमेव द्रढयति नहीति तदभावस्येत्यत्र तत्पदेन पक्षनिष्ठाभावप्रतियोगित्वेन ज्ञानपरामर्शोर्थे अप्र
तियोगित्वज्ञानान्तं प्रतियोगित्वज्ञानान्तरभावेन व्याचष्टे पक्ष इति लक्ष्मानप्रतिबंधकत्वरूपत्वद्विरोधित्वमेवा
प्रतियोगित्वानिरूपत्व न अर्थ इति भावः अबाधितज्ञानस्यानुमितिहेतुतया साध्यकपदस्य सिद्धिकारणपर
तान्तरसंभवतीस्त्यत इत्याचष्टे साध्येति कथंचित् तादृशबाधनि[illegible]या भावसंपादनेन साध्यकपदस्यासि ध्य
द्धिकारणपरत्वमुपपादयितुमन्यथा व्याचष्टे पक्षनिष्ठेत्यादि तत्सदस्याविशेष्यीभूताभावपरतया [illegible]
कर्म धारयोपगमे अभावपदस्य धर्मिमतः षष्ठीतत्पुरुषाभिप्रायेण व्याचष्टे तदभावस्येति केचित्तु तस्यैऽग्रिमेऽ स
भावस्येत्यत्र सामानाधिकरण्येनान्वयितया च परकल्पाभिप्रायेण कर्मधारयएवाचलं वर्णीयस्ताद्धदस्यावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० केव०
११५

शेषणपरामर्शकतायाऽपि तत्कुशोदर्शनात्तच्छंकानिरासायाभावपदमित्याकूतः अभावप्रतियोगित्वप्रका
रकज्ञानत्वेन तत्तज्ज्ञानाभावस्य पक्षताघटकत्वे साध्याभाववानुपक्ष इति निश्चयदशायां पक्षव्यवहारप्रसंग
इत्यतस्तत्साधारणप्रतियोगितावच्छेदकं दर्शयति साध्येति साध्यविषयतानिरूपितां इत्राप्रतियोगित्वविषय ता
ताशालिनिश्चयत्वेनेत्यर्थः प्रतियोगित्वानुयोगित्वयोः स्वरूपसंबंधविशेषत्वानुपगमे साध्याभाववान्पक्ष इति
ज्ञानस्य न साध्यांशे प्रतियोगितावगाहित्वं किंतु अभावांशे एव तदनुयोगितावगाहित्वमतो नोक्तरूपेण त
त्संग्रहः एवं साध्यांशे कालिकादिसंबंधेन प्रतियोगित्वप्रकारकधीवारणाय साध्यांशे प्रतियोगित्वप्रकार
कधियः स्वंबंधविशेषावगाहित्वे नैवन्निवेशनीयत्वयाप्रतियोगितासंसर्गकबुद्धौ च तदीयसंसर्गांशानादपि
न तयोरुक्तरूपेणानुगमसंभवः एवं अभावे साध्ये प्रतियोगिमत्त्वावगाहिबाधबुद्धेः संग्रहश्चेत्यतः प्रकृतपक्ष
धर्मिकप्रकृतसाध्यविशिष्टबुद्धिप्रतिबंधकत्वेन तदुच्चयमनुगमयति साध्यविशिष्टेति तत्प्रतिबंधकत्वं चाग
स्याऽननुगतमेव वाच्यमिति ध्येयं सपक्षसत्त्वादिरूपगमकतौपयिकगणनेव्यतिरेकपदेन विपक्षासत्त्वस्या
गणना व्यतिरेकाविकलत्ववदित्यत्र व्यतिरेको भासने इत्यत्र च व्यतिरेकपदस्य लक्षणार्थकतां स्फुटयति व्यतिरेक
इति व्यतिरेकव्याप्तेरनुमितिप्रयोजकतां व्यवस्थाप्य व्यतिरेकस्य सहचारविधया तादृशव्याप्तिग्राहकत्वेनानु राम०
नुमित्युपयोगित्वं व्यतिरेको भासने इत्यनेनाभिहितं पुनर्विपक्षवृत्तित्वशंकानिवासमात्रद्वारा व्यतिरेकव्याप्तिग्रहे ११५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयोगितासन्निधानं विरुध्यते अन्वयव्याप्तिग्रहे तदनपेक्षणे व्यतिरेकव्याप्तेश्च विशिष्योपादानेन अन्वयव्या
प्तिग्रहे तदनपेक्षालाभात् । केवलान्वयिन्युक्तशंकानुदये न तदनपेक्षासन्निधानमप्यसंगतमतो व्यतिरेकव्या
प्ताविति मूलस्यान्वयव्या[redacted] प्त्यर्थकतामाह व्यतिरेकेति । केवलान्वय्यनुमानेऽस्वातंत्र्येण एवं उपितुमुपक्र
मते अत्र वदंतीति व्याप्तिरिति अनुमितिः सोपाधिकमित्यर्थः । एवकारेण केवलान्वयिसाधारणव्यापकसामाना
धिकरण्येऽनुमितिसोपाधिकत्वव्यवच्छेदः । लाघवादिति व्यापकसामानाधिकरण्यापेक्षया लघुशरीरत्वादित्यर्थः ।
व्यापकतागर्भव्याप्तौ वह्नित्वादिरूपसाध्यतावच्छेदकविशेषणकसामानाधिकरण्यस्य हेतुमन्निष्ठाभा
वप्रतियोगितावच्छेदकसाभावस्य हेतुविशेषणे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावाधिकरणवृत्ति
त्वाभावत्वरूपशरीरत्वेऽपि अनवच्छेदकत्वधर्मितावच्छेदकत्ववह्नित्वत्वादेः साध्यसामानाधिकरण्यस्य चाधिक
स्यानिवेशेन गौरवं बोध्यं एवं च तादृशव्याप्तिविशिष्टहेतुमत्तासामान्यहेतुतामते अधिकविषयतानां द्विधा हेतु
विषयतायाश्च निवेशात् कारणतावच्छेदकगौरवान्न विनिगमनाविरहेणान्वयव्याप्त्योरनुमितिप्रयोजकते
ति भावः । एतन्मते अवच्छेदकलाघवमुक्त्वा कल्पनालाघवमाह प्रायस इति । साधनभेदेपीति । साधनतावच्छेदक
भेदेपीत्यर्थः । अभेदादिति । तथा च धूमत्वालोकत्वाद्यवच्छिन्नलिंगकबहुविधपरामर्शानां वह्न्याद्यभाववदवृत्ति
त्वावच्छिन्नप्रकारकपक्षधानिश्चयत्वेन एकमेव हेतुत्वमेतन्मते व्यापकसामानाधिकरण्यरूपव्याप्तेश्च हेतुतावच्छेदक

गदा० के०
११६

विशेषघटितत्वयात्तदवच्छिन्नप्रकारकज्ञानहेतुतायाः हेतुतावच्छेदकधूमत्वादिभेदेन भेद इति गौरवं। न च व्याप
कतायाहेतुतावच्छेदकधूमत्वाद्यवच्छिन्नघटितत्वेपि व्यापकताघटकपदार्थानां विषयताकूटे निवेश्यमाने हेतुता
वच्छेदकावच्छिन्नविषयतायाः सामान्यतः किंचिद्धर्मावच्छिन्नविषयतात्वेनैव कारणतावच्छेदककोटौ निवेशा
नीयतया व्यापकताज्ञानहेतुतामतेपि न धूमत्वादिभेदे तद्भेद इति वाच्यं। धूमव्यापकवह्निसमानाधिकरणाद्य
वान्निसादिज्ञानवारणाय तत्तद्धर्मावच्छिन्नव्यापकसाध्यसामानाधिकरण्येन तत्तद्धर्मेण चावच्छिन्नाया प्रकारता
तद्वत्वेनैव हेतुतया अनुगमासंभवात् तत्स्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यावच्छिन्नत्वस्वावच्छिन्नत्वोभ
यसंबंधेन सामान्यतो धर्मविशिष्टत्वेनानतिप्रसक्तेन धूमादिन्योक्तादिनिष्ठपरामर्शप्रकारतानामनुगमः संभवती
ति तु न समयक्तत्ताद्रशापरंपरयाः संबंधत्वेमानाभावात् जातिविशेषत्वादिना धूमत्वाद्यवगाहिनो जातिविशेष
व्यापकसमानाधिकरणधूमवान्निसादिज्ञानादनुमित्यापत्तेश्चेति भावः। वह्न्याद्यभाववति धूमादेः समवायादि
नावृत्तेर्हेतुतावच्छेदकीभूतसंयोगादिना अवृत्तित्वस्य प्रवेशनीयतया एकसंबंधेन साध्याभाववदवृत्तित्वं अ
परसंबंधेन च पक्षधर्मत्वमवगाहमानात्तत्ज्ञानादनुमित्यापत्तेर्वारणाय विशिष्यसंबंधान्निवेश्यस्यैव संबंध
घटितव्याप्तिपक्षधर्मताविषयकज्ञानस्य हेतुतायाः कल्पनीयतया विभिन्नसंबंधेन व्याप्यत्वेषु धूमरूपविशेषा राम०
दिषु व्याप्तेर्भेदात्तद्विषयकपरामर्शकारणतोच्छेदश्चावश्यक इति प्रायशाद्रक्ष्यं। अथ हेतुतावच्छेदकमनिर्वच्य ११६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानकालेपि निर्द्धर्मितावच्छेदकव्याप्तिज्ञानोत्पत्त्यास्यानुमित्यापत्तिरावश्यकत
याव्यभिचारस्य हेतुदोषत्वानुपपत्तिरिति चेन्न किंचिद्धर्मावच्छिन्नहेतुताकनिश्चयत्वेन हेतुत्वात् वस्तुतः पक्षवृत्तित्वेन
निश्चीयमानधूमत्वाद्यवच्छेदेनाव्यभिचारनिश्चयं विना पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशयस्यानिवृत्तेः पक्षेऽव्यभि
चारिसामान्याभावकोटिकसंशयस्यापि साधारणवर्जितस्य संभवे नाव्यभिचारांशे निर्द्धर्मितावच्छेदकस्यापि पक्षेऽव्यभिचारि
निश्चयस्यासंभवे न धूमत्वादिविशिष्टे व्यभिचारग्रहस्यानुमित्यासत्तिविरोधित्वात्। अथ धूमालोकादिपरामर्शानामे
करूपेणाहेतुत्वे धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावरूपा पक्षता धूमलिंगकपरामर्शस्यैव सहकारिणी न त्वालो
कलिंगकपरामर्शस्येति सहकारित्वनियमानुपपत्तिः। सिद्धिकाले धूमलिंगकानुमितीच्छासत्त्वे धूमपरामर्शसत्त्वे च यद
कारणतावच्छेदकावच्छिन्नस्तोमात्मिका सामग्री फलं जनयतीति तस्याः तदानीमसत्त्वे धूमपरामर्शस्येति चालोकपरामर्शेन
स्याप्यावश्यकतयाऽनुमितेर्दुर्वारत्वादिति चेन्न एतन्मते हि पक्षता लिंगविशेषनियंत्रिता नोपेयते अपि तु तत्तल्लिंगपरा
मर्शविशिष्टतत्तल्लिंगकानुमितीच्छाविरहविशिष्टसिद्ध्यभावरूपा एकैव पक्षता नानालिंगकपरामर्शसहकारिणीत्यत्र
नातिप्रसंगशंकापि न चैवमेकान्यानंतानां परामर्शानां विशिष्टेच्छाभावानां निवेशे तेषां मिथो विशेष्यविशेषणभावे विनिग
मनाविरहेण बहुतरकारणताधिक्यप्रसंग इति वाच्यं। सिद्धिकाले विनापि तत्तल्लिंगकेच्छामालोकलिंगकेच्छाबलाद्धूमालो
कोभयलिंगकसमूहालंबनपरामर्शाद्धूमलिंगकानुमितिफलस्याव्यभिचारेण तत्तल्लिंगकानुमितौ तत्तल्लिंगकानुमितीच्छाविरह

धूमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदा० के० ११७

विशिष्टसिद्ध्यभावत्वेन हेतुत्वासंभवादुक्तरीतेः सर्वैरेवादरणीयत्वात् तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकानुमि
तीच्छातोऽस्वीयव्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयतावच्छेदकधर्मावच्छिन्नलिंगकत्वप्रकारकत्वसंबंधेनपरा
मर्शविशिष्टानुमितित्वेनानुगमय्य एक एवाभावः सिद्धौ विशेषणतया निवेश्यत इत्यप्याहुः ननु धूमालोकादिप
रामर्शानामेकरूपेणाहेतुत्वे तदवच्छेदकनिश्चयत्वशरीरे धूमत्वालोकत्वाद्यवच्छिन्नाभावकोटिकसंशयानामनुग
तरूपेणाननुगतरूपैर्वा प्रवेशस्यैव निवेशनीयतया वह्निव्याप्यधूमवानयं वह्निव्याप्यालोकवांश्चेत्याद्याहार्यसंश निखिल४
यादनुमित्यनुदयापत्तिः नच संशयत्वघटकव्याप्यविषयताभिन्नत्वं अनुमितिजनकतावच्छेदकव्याप्यविषयतायां नि
वेशनीयमित्यत्र तज्ज्ञानीयधूमादिविषयतायाः संशयत्वाघटकतया न तत्संग्रह इति वाच्यं प्रत्येककोटिनिश्चयीयविष
यतातिरिक्तविषयतायाः संशयेऽप्रामाणिकतया निश्चयीयव्याप्यविषयताया एव विपरीतकोटिसहितायाः संशयघ
टकत्वात् स्वनिष्ठसंशयत्वघटकीभूताविषयतान्यव्याप्यविषयताश्रयं यत् यद् तद्व्याप्यवत्ताज्ञानत्वेन हेतुत्वोपगमे त त्व
त्संशयव्यक्तीनां प्रातिस्विकरूपेण प्रवेशे भेदकूटनिवेशपर्यवसानात् तावतां भेदानां विशेषणविशेष्यभावे विनिगमना
विरहेण कारणतानंत्यप्रसंगादिति चेन्न व्याप्यत्वावच्छिन्नाभावकोटिकसंशयभेदस्यैव निवेशनीयः ननु धूमत्वालो
कत्वाद्यवच्छिन्नाभावकोटिकसंशयानां तत्तद्रूपेण भेदकूटः। धूमत्वाद्यवच्छिन्नाभावकोटिकव्याप्यंतर निश्चया रा म०
नात्मकेऽव्याप्यवत्तासंशयेऽपि उपस्थितव्याप्यत्वावच्छिन्नाभावविषयकत्वमपि कल्प्यते तादृशाभावमात्रविरोधिनोऽन्या ११७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्यवत्तानिश्चयस्य व्याप्यव्याप्यवत्तानिश्चयस्य वा प्राक्सत्त्वे तदुत्तरं जायमानो धूमत्वाद्यवच्छिन्नाभावकोटिकोऽपि संश
यो व्याप्यत्वपर्याप्तप्रकारताकनिश्चयरूप एव तादृशनिश्चयसामग्र्यास्तत्राक्षतत्वादिति ततो जायत एवानुमितिरिति
न कश्चिद्दोष इति। केचित्तु विरोधानुपस्थितिकालीनाभावाभावसंशयस्य तदुभयसमुच्चयविलक्षणत्वनिर्वाहेन
विरोधविषयकतया संभवति अनुपस्थितविरोधस्याप्रकारत्वात् तत्संसर्गताया अप्रामाणिकत्वात् एतदनुरो
धेन तदुपगमे संशये कोटिविषयताया एव विलक्षणाया उपगन्तुमुचितत्वात् तथा च संशयत्वघटकविलक्षणकोटि
विषयताभिन्नत्वमेवानुमितिजनकतावच्छेदकं व्याप्यविषयतायां निवेशनीयं वैलक्षण्यं च तस्याः पदार्थान्तररूपं क्लृप्तान
गतरूपं वेत्यन्यदेतत्। न च विरोधानुपस्थितिदशायां नाभावाभावयोः संशयः अपि तु तदुभयसमुच्चय एवेति विरोध
स्यानिखिलसंशये प्रकारतयैव भानमिति वाच्यं। भावाभावयोर्विरोधभानमते तदेव तदुभयसमुच्चयस्यानुमि[illegible]त्वात्॥ चविरुध्द७
न च तदानीं संशयसमुच्चयावेवानभ्युपगन्तव्याविति वाच्यं प्रत्येकसामग्रीभ्यां प्रत्येकं स्वस्वकार्यजनने बाधकाभावात्तदनु
भयवत्सामग्र्याः परस्परफलप्रतिबन्धकत्वात् अन्यथा संशयोच्छेदादिसाङ्कः। अन्ये तु संशये भावाभावोभयप्रकार
तानिरूपिताएकविशेष्यतासमुच्चये तु प्रकारभेदेन तद्भेद इत्युभयोर्वैलक्षण्यं एवं च भावाभावप्रकारतानिरूपितव्याप्य
प्रकारतानिरूपितविशेष्यताकत्वमेव सर्वसाधारणं व्याप्यवत्तानिश्चयत्वं। भावद्वयकोटिकोऽनु संशयः प्रामाणिकः
धूमवान् जलत्ववान् वायमिति संशयाभावद्वयस्यापि नानोपगमात्। अभावभासकसामग्र्याः सत्वे विरोधाग्रहे समुच्चयस्ये
वोपगमात्। विरोधग्रहदशायां तस्यैव विरोधिप्रकारकत्वेनैव सामग्रीसहितस्य तत्प्रकारकालौकिकविषयताशालिज्ञानप्रति

निश्चये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग दा० के० बंधकतयाउभयप्रकारकज्ञानस्यैवासंभवात् निश्चयसामग्री च तदभावप्रकारकज्ञानसामग्र्यसमवहिततत्
११८ त्प्रकारकज्ञानसामग्री न तु निश्चयत्वावच्छिन्नसामग्री निश्चयत्वजन्यतानवच्छेदकत्वात् तदसिद्धेः पीतत्वशंखत्वयो
र्विरोधित्वेन ज्ञायमानयोर्दोषवशादेकधर्मिण्येव निश्चयविषयतया भावद्वयकोटिकज्ञाने संशयत्वासंभवे स्य
न असति दोषविशेषे लौकिकसंनिकर्षादौ च एकधर्मिणि तादृशयोर्निश्चयासंभवेन च तादृशप्रतिबध्यप्रति
बंधकभावस्य प्रामाणिकत्वादिति तदसत् अभावत्वघटितधर्मावच्छिन्नहेतुमत्वपरामर्शस्य व्याप्यत्वावच्छि
न्नप्रकारतानिरूपितविशेष्यतायां अभावत्वावच्छिन्नप्रकारतानिरूपितत्वसत्वेन तादृशपरामर्शनिश्चयत्वा स्य
नुपपत्तेन च व्याप्यत्वावच्छिन्नप्रकारताभिन्नप्रकारतात्वेन विरोधिकोटिप्रकारतानिवेशात् न्यायं दोष इति वाच्यं।
यत्र विरोधिकोटेरपि साध्यव्याप्यतया भानं तादृशसंशयस्य दुर्वारत्वात् एवं शुद्धपर्वतत्वाद्यवच्छेदेनाभावप्रका
रकस्य नीलपर्वतत्वादिविशिष्टे व्याप्यवत्तावगाहिनः संशयस्य न्यूनाधिकधर्मावच्छिन्नभावाभावोभयप्रकार
तानिरूपितविशेष्यतयोरैक्यासंभवात् नीलरूपावत्वावच्छेदेन वह्निव्याप्यवत्तानिश्चयादिदशायामपि तादृश
संशयोत्पत्तात्र नीलपर्वतत्वावच्छिन्नविशेष्यतायां वह्निव्याप्याभावप्रकारतानिरूपितत्वानुपगमासंभवात्।
तादृशसंशयएवासिद्धः एकधर्मपर्याप्तकोटिद्वयधर्मितावच्छेदकताकबुद्धेरेव संशयत्वादिति तु न वाच्यं। यदंशा राम०
भानप्रयुक्तं संशयत्वं तज्ज्ञाने अधिकस्य एकतरकोटिधर्मितावच्छेदककोटौ भानेपि अधिकं किंचित्सादिन्यायेन ११८
संशयत्वावश्यकत्वात् तुल्यबलसामग्रीभ्यां तादृशाज्ञानजननेबाधकविरहेण तथाविधज्ञानमेव न जायत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृश्यत्वसंभवात् संशये कोटिद्वयनिरूपितविशेष्यत्वयोरवच्छेद्यावच्छेदकभावः समुच्चये तु न तथा एवं चा
भावप्रकारतानिरूपितविशेष्यतानवच्छिन्नतत्प्रकारकविशेष्यताकत्वं तन्निश्चयत्वमित्यपि न युक्तं स्वविरुद्ध
त्वयाज्ञायमानद्वयोपस्थापितभावाभावोभयविशिष्टधर्मिविषयकज्ञाने विशृंखलधर्मिविषयताद्व
यीपगमे ज्ञानस्य समूहालंबनतया एकवाक्यताविरहेण समासानुपपत्त्या धर्मिविषयताद्वयस्यावच्छेद्या
वच्छेदकभावध्रौव्येन तादृशज्ञानस्य निश्चयत्वानुपपत्तेरित्यादिकं भावद्वयमात्रकोटिकोपि संशयोऽभ
भावभानस्य सामग्र्यसत्वेऽनुभवसिद्धः। समानबलसामग्रीद्वयसंवलनसिद्धोक्तसामग्री प्रतिबंधकता
याम प्रामाणिकत्वात्। संशयत्वे च कोट्यंशे लौकिकविषयताविरहस्य प्रयोजकतया कल्पितदोषविशेष
जनिश्चये तदभावनिर्वाहात् लौकिकविषयत च साक्षात्त्वजातिव्यंजकविषयता सा च दोषविशेषजन्या
नेपि शंखः पीतद्रव्यादिभ्रमानंतरं पीतिमानं साक्षात्करोमीत्यनुव्यवसायोदयात् एवं चाभावप्रकारतानि
रूपितत्वादिना व्याप्यविषयतीयानिश्चयत्वघटकत्वेऽतिप्रसंगो दुर्वार एवेत्यपि वदंति इदं तु बोध्यं संशय
समुच्चययोर्वैलक्षण्याय संशये कोटिद्वयप्रकारतयोरवच्छेद्यावच्छेदकभावः स्वीक्रियते एवं च किंचि
त्प्रकारतानवच्छिन्नव्याप्तिप्रकारितत्वं ज्ञानत्वमेव व्याप्यवत्तानिश्चयत्वं धूमालोकादिपरामर्शसाधा
रणमनुमितिजनकतावच्छेदकं तत्र च न काचिदनुपपत्तिः। अभेदेऽवच्छेद्यावच्छेदकभावविरहात् न तत्प्रका

गदा० केव० रकसस्यतत्प्रकारकत्वावच्छिन्नत्वरूपं कापि संशयत्वं मानसत्वव्याप्यजातिरव्याप्यवृत्तिं सर्वत्र संशयस्य मान
११९ सत्वतया एवोपगमाच्चेत्क्षः स्वन्निकर्षादिनाऽयऽन्निकसंशयदशायां पर्वतं पश्यामीत्यनुव्यवसायश्च संशयस्य
पूर्वं परतो वा जायमानतद्विषयकचाक्षुषादिज्ञानकल्पनेन तद्विषयकतयैवोपपादनीयः संशयत्वस्य चावच्छेद
कं तत्तद्धर्मिविषयकत्वावच्छिन्नतत्तत्कोटिविषयकत्वमेव एवं च पक्षविशेष्यकत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रका
रकत्वावच्छेदेन संशयत्वाभाववत्त्वमेव पक्षे व्याप्यवत्तानिश्चयत्वं वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्याऽऽलो
कवांश्चायं पर्वतो वह्निव्याप्यधूमवानित्यत्र वह्निव्याप्यधूमवत्त्वाद्यात्वादिसंशये च पर्वतत्वविशेष्यकत्वावच्छिन्न
धूमप्रकारकत्वावच्छेदेन संशयत्वाभावोऽननुभवसिद्ध एव पर्वते धूमं न संदेह्मि प्रतीतेः सर्वानुभवसिद्धत्वादि
ति नानुपपत्तिः चाक्षुषादिज्ञानस्यापि संशयत्वे सांकर्यभयेन नानैव संशयत्वजातिस्वीक्रियते तेन तदभावकू
टवत्त्वमेव निश्चयत्वं घटकं अनंतहेतुतावच्छेदकभेदेन अनंतकारणत्वकल्पनापेक्षया कतिपयसंशये
त्वजातिभावघटितनिश्चयत्वेन सर्वसाधारणकारणत्वकल्पने लाघवात् जातेरव्याप्यवृत्तितानिश्चयादिभिर
पि स्वीक्रियते इति नायं सिद्धांतभीतिः न च तु वा संशयत्वजातिरव्याप्यवृत्तिरेव तद्विशिष्टनिरूपितत्वं संशय
कोटिविषयतायाएवोपेयते न च तु च संशयनिश्चययोर्विषययोर्विषयताभेदः तं विना संशयसमुच्चययोर्वैल राम०
क्षण्यानुपपत्तेरुक्तत्वात् एवं च संशयत्वविशिष्टानिरूपितत्वस्य पक्षविषयतानिरूपितव्याप्यविषयतायां निवेशात् सर्व ११९
पृथक् सामंजस्यमिति धूमत्वालोकत्वावच्छिन्नाभावघटितत्रमत्वज्ञानानामाभानोद्दिष्टकूपरामर्शविशेषणतायाः सहकारितामावाश्रेतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोधात्साध्यनतावच्छेदकभेदेन परामर्शकारणताभेद-आवश्यक इति केचिद्दिधितिकारमाक्षिपंति तत्तद्विषयतासंबंधेन तत्त
दप्रामाण्यग्रहविशिष्टधूमादिप्रकारताभेदकूटविशिष्टत्वेन व्याप्यविषयतानां कारणतावच्छेदकत्वे आलोकादिविषयताया धू
माभावादिघटितभ्रमत्वग्रहेस्यात्तं-अपणाभावेपि तादृशभ्रमत्वग्रहविशिष्टधूमादिविषयताभेदसत्वात्तदानीमालोकादिपरामर्शादनु
